अखिलभारतीय–प्राच्यविद्यासम्मेलनम्
शतवर्षमहोत्सवग्रन्थमाला – ८६

‘पण्डिता’ क्षमा रावमहोदयया विरचितं

तुकारामचरितम्

इति महाकाव्यम् (प्रथमसर्गः)

अनुवाद तथा व्याख्या
डॉ. पराग जोशी

प्रधानसंपादक
आचार्य श्रीनिवास वरखेडी
कुलगुरु

संपादक
आचार्य मधुसूदन पेन्ना
संचालक, संशोधन प्रकाशन विभाग



कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
रामटेक, जि. नागपुर (महाराष्ट्र)

२०२०

शीर्षक — तुकारामचरितम्

अनुवाद तथा व्याख्या— डॉ. पराग जोशी

प्रधान संपादक — आचार्य श्रीनिवास वरखेडी
कुलगुरु, क.का.सं.वि., रामटेक

संपादक — आचार्य मधुसूदन पेन्ना
संचालक, संशोधन व प्रकाशन विभाग,
क.का.सं.वि., रामटेक

अखिल भारतीय प्राच्यविद्या सम्मेलन — प्रो. गौतम पटेल, अध्यक्ष
प्रो. सरोजा भाटे, सचिव
प्रो. ग. उ. थिटे, उपाध्यक्ष

संपादक मंडळ — डॉ. दिनकर मराठे, क.का.सं.वि., रामटेक
डॉ. वीणा गानु, नागपुर.

प्रकाशन वर्ष — २०२०

आवृत्ती — प्रथम

मूल्य — रू. १८४/—

आय.एस.बी.एन. — ९७८—९३—८५७१०—४३—८

मुखपृष्ठ — श्री. उमेश पाटील

मुद्रक — दुर्गा प्रिन्टींग, नागपूर

प्रकाशक — कुलसचिव, क.का.सं.वि., रामटेक
प्रशासकीय भवन, मौदा रोड, रामटेक.

PREFACE

It is indeed a matter of great pleasure and pride for Kavikulaguru Kalidas Sanskrit University, Ramtek to have this rarest opportunity of hosting the 50th session of All India Oriental Conference at Nagpur. This AIOC-50th session at Nagpur will be forever remembered by all as the year 2019 also happens to be the year of Centenary Celebration of AIOC. The premier objective with which the great scholars of yester years had contemplated and established this national academic event called All India Oriental Conference has been achieved through these years with scores of young scholars contributing significantly to the treasure house of knowledge through their valuable research work.

The research of yore and of the present should be properly recorded so as to make it easily available to all lovers of knowledge and wisdom in the years to come. With this objective, we have contemplated to commemorate the 100th year of this grand event of 50th session of AIOC by way of publishing 100 monographs on different subjects in four languages viz., Sanskrit, Hindi, Marathi and English. It is no doubt a herculean task but still worth of it, for the reason that these 100 monographs will inspire many young scholars to take upon a fresh study and research of the oriental subjects with more vigour and zeal.

The AIOC Centenary Publication Series includes wide variety of subjects like Literature, Language, Veda, Indian Philosophy, Sanskrit Grammar, Law, Children Literature, Yoga, Astronomy and Astrology, Ayurveda, Pali, Prakrit, Jain, Buddhism, Education, Library Science, Poetics, Aesthetics, and Indology. It also includes reprint of some rare texts of academic importance which have gone out of print are not easily available. We wish to mark this centenary celebrations with this series that connects the glory of the past and aspirations of future. I place on record my sincere gratitude to all the authors of these monographs who have kindly contributed to the richness of this series.

I am confident that the books published in these series will definitely inspire the lovers of Oriental Learning in general and of Sanskrit Language and Literature in particular.

On this occasion, we have published a memorable book of all the speeches of Section-Presidents of all previous sessions of AIOC. It is indeed a very capacious addition to any collection. I with all respect thank two eminent scholars of our times - Prof. Gautam Patel, President and Prof. Saroja Bhate, General Secretary, the torch bearers of AIOC who have not only encouraged us in this venture but also made all efforts to provide these valuable historical speeches for us. I thank all executive members of AIOC and my colleagues of the varsity for making this event a grand success. My words fall short in describing the painstaking efforts and scholarly commitment of my esteemed colleague Prof. Madhusudan Penna, local secretary of this session in bringing out this series.

I also take this opportunity to profusely thank Shri. Subhash Jain and Shri Dipak Jain, the proprietors of New Bharatiya Book Corporation, New Delhi for their enthusiastic approach and timely work with all precision and grace.

Let us all sanctify ourselves in the eternal flow of wisdom by reading these books and recommending these to others also!

सरस्वती श्रुतिमहती महीयताम्

Ramtek
10th January 2020

Prof. Shrinivasa Varakhedi
Vice Chancellor, KKSU

Kavikulaguru Kalidas Sanskrit University
All India Oriental Conference

100th Year 50th Session
10th-12th January, 2020

Chief Patron
Hon'ble Nitin Gadkari
Minister of Road, Transport & Highways of India

Patron
Prof. Shrinivasa Varakhedi
Vice Chancellor, KKSU, Ramtek

AIOC President
Prof. Gautam Patel
Chairman, Sanskrit Seva Samiti, Ahmedabad.

AIOC General Secretary
Prof. Saroja Bhate
Professor of Sanskrit (Retd.), Pune University, Pune

AIOC Local Secretary
Prof. Penna Madhusudan
Dean, KKSU, Ramtek

Additional Local Secretary
Dr. Harekrishna Agasti
Dr. Kalapini Agasti
Dr. Dinakar Marathe
Dr. Parag Joshi

Organising Committee
Prof. C.G. Vijayakumar, Registrar (I/c) & Dean, KKSU, Ramtek
Prof. Nanda Puri, Dean, KKSU, Ramtek
Prof. Krishnakumar Pandey, Dean, KKSU, Ramtek
Prof. Laita Chandratre, Dean, KKSU, Ramtek
Dr. Ramachandra Joshi, Finance Officer, KKSU, Ramtek
Dr. Umesh Shivahare, Controller of Examination, KKSU, Ramtek
Dr. Dipak Kapade, Librarian, KKSU, Ramtek
Dr. Renuka Bokare, PRO, KKSU, Ramtek

Shri. Rajivranjan Mishra, Technical Head, KKSU, Ramtek
Shri. Pravin Kalambe, Security Officer, KKSU, Ramtek

Reception Committee

Prof. Shrinivasa Varakhedi, Chairperson Reception Committee & VC, KKSU
Parampujya Govindagiri Swamiji, Rishikesh
Prof. P.T. Chande, Former VC, KKSU
Prof. Uma Vaidya, Former VC, KKSU
Prof. Vijendra Kumar, VC, National Law University, Nagpur
Prof. Rajnish Shukla, VC, National Hindi University, Wardha
Prof. Vinayak Kane, VC, RTM Nagpur University, Nagpur
Shri. Krupal Tumane, Member of Parliament
Shri. Girishji Vyas, Member of Legislative Council
Shri. Chandrashekhar Bawankule, Guardian Minister, Nagpur
Prof. Vishram Jamdar, Director, VNIT, Nagpur
Dr. Bhushankumar Upadhyay, Commissioner of Police, Nagpur
Shri. Vijay Phanshikar, Editor, The Hitavada, Nagpur
Shri. Rajkumar Tirpude, Tirpude Group of Insitutions, Nagpur
Shri. Mohabbat Singh, Tuli International, Nagpur.
Shri. Chandragupta Varnekar, Principal Retd., Nagpur
Shri. Suresh Sharma, Baidyanath, Nagpur
Shri. Prabhakar Rao Mundle, Dharampeth Educational Institutions, Nagpur

Executive Committee

Prof. G. U. Thite,
Vice President

Dr. Brijeshkumar Shukla,
Treasurer

Members

Dr. Rajni Satish Chandra Jha
Prof. Shukla Ramakant
Dr. Behera Ranjit
Dr. Meena Shukla
Dr. Nirmala Kulkarni
Dr. Roy Gauri Nath
Dr. Tripathi Uma Rani
Dr. Pushpa Jha
Dr. Basu Ratna
Dr. Mithilesh Kumar
Prof. Singh Prasoon Dutta
Shri. Mishra Arun Ranjan
Dr. Mishra Baidyanath
Dr. Tripathi Rajendra Rasraj
Shri. Harshdev Madhav
Dr. Kamdev Jha
Dr. Parinita Deshpande
Dr. Jha Udayanath (Ashok)

हृद्गतम्

सुकुमारमतीनामपि कर्तव्याकर्तव्यबोधनाय प्रवृत्तं शास्त्रं साहित्यम्। शास्त्रमिदं कान्ता इव उपदिशति, प्रेरयति च जनान् सन्मार्गे । अत एव अस्य सकलजनग्राह्यत्वम्। अर्वाचीनसंस्कृतसाहित्ये काव्यजगति सुविख्यातं नाम वर्तते पण्डिता क्षमादेवी राव । इयं महोदया स्वीयप्रगल्भेन साहित्येन संस्कृतजगतः प्रसारं प्रचारम् च अकरोत्। संस्कृतरचनापरम्परां रक्षन्ती एषा अर्वाचीनसंस्कृतसाहित्यविकासमकरोत्। पण्डिता क्षमादेवी रावमहोदयया न केवलं महाकाव्यलेखने स्वीयवैदुष्यं प्रकाशितं चेत् अनया लघुकथाः, गद्यकाव्यानि अपि विपुलतया रचितानि सन्ति। अस्याः परिचयः सर्वेषां कृते भवतु इति मनसि निधाय छात्रोपकराय, साहित्यशास्त्रपिपठिषूणां कृते पुस्तकमिदं सुकुमारमतिना मया सरलसंस्कृव्याख्यया 'मराठी' अनुवादेन सहितं च लिखितम्। विदुषाम् आवलौ नूनमिदं पुस्तकं सामान्यं तथापि ममायं सुकुमारप्रयासः नन्दयतु सहृदयानां चेतांसि इति आशास्ये।

विश्वविद्यालयस्य संस्कृतभाषा एवं साहित्यसङ्कायस्य अधिष्ठात्री अस्मत्साहित्यविभागप्रमुखा डॉ. नन्दा पुरी महाभागाभ्यः अहं कृतज्ञतां निवेदयामि या साहित्यशास्त्रललितसन्निवेशे कृतभूरिपरिश्रमा वात्सल्यपूर्णा मामपि साहित्यस्य प्रचाराय ईदृशं पुस्तकं रचयितुं प्रेरितवती। पुस्तकस्यास्य निर्माणसमये सर्वविधसहाय्यम् प्रदत्तवत्यै डॉ. वीणा गानू महोदयायै तथा मे सर्वकालिकमित्रेभ्यः सर्वान् साधुवादान् वितरामि। टङ्कणमुद्रणादि कार्ये सहाय्यं कृतवद्भ्यः श्री. विजय देशपाण्डे महोदयेभ्यः धन्यवादान् वितरामि।

* * *

प्रस्तावना

जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः ।
नास्ति येषां यशः काये जरामरणजं भयम् ।।''

कविभारत्याः वरदपुत्राः सुकृतिनः रससिद्धाः कवीश्वराः प्रपञ्चे विरला एव भवन्ति तथापि संस्कृतसाहित्यप्रपञ्चे प्रचुरतया कवीश्वराः दरीदृश्यन्ते यैः स्वीय-रससिद्धवाण्या काव्यजगत् प्राकाशितं वर्तते। एतादृशानां महाकवीनां कृतिषु पञ्च महाकाव्यानि काव्यजगति पञ्चप्राणायन्ते। एतानि महाकाव्यानि कविकुलस्य प्रेरणास्रोतांसि विद्यन्ते। एतेभ्यः प्रेरणाम् अवाप्य नैके कवयः संस्कृतसाहित्यगङ्गाधारां निरन्तरतया प्रावाहयन्। प्राचीनसंस्कृतसाहित्यं तु एवंविधाभिः रचनाभिः प्रपूरितं दृश्यते। आसप्तमशताब्दं संस्कृतसाहित्यस्य इयं गङ्गा वेगेन प्रवहन्ती काव्यरसिकानां तृष्णां शमयन्ती सर्वान् पुनीतान् अकरोत्। ततः परं साहित्यगङ्गायाः अस्याः प्रवाहः ईषत् मन्दः अभवत् किन्तु न स्थगितः। अर्वाचीनसंस्कृतसाहित्यस्य परम्परा अनवरतया अग्रेसारिता। बहुभिः विद्वद्भिः भगीरथप्रयासेन अर्वाचीनकाले संस्कृतसाहित्यरचनापरम्परा सन्ततं रक्षिता स्वीयकाव्यैः।

अर्वाचीनसंस्कृतसाहित्ये संस्कृतकाव्यरचनायाः प्रमाणम् ईषद् न्यूनं जातं चेदपि संख्या तु न तथा विरला सञ्जाता। यथा प्राचीनसंस्कृतसाहित्ये विपुलतया काव्यग्रन्थाः समुपलभ्यन्ते न तथा अर्वाचीने। तथापि नैकाः उत्तमाः कृतयः, अनुपमाः रचनाः अर्वाचीनसंस्कृतसाहित्यं सुशोभयन्ति। ऐतिह्याधारितकाव्यरचनायाः या परिपाटी पुरा काले आसीत् सा परिवर्तनं प्राप्य आधुनिका अभवत्। अर्वाची- नसंस्कृतसाहित्यस्य विषयाः न केवलम् ऐतिह्याधारिताः सन्ति अपि तु अत्र नवीनानां सामाजिक- आधुनिकविषयाणाम् आधारोऽपि स्वीकृतः वर्तते। क्वापि कथावस्तुनः ग्रथनं सामाजिकसमस्याधारितं दृश्यते। क्वचित् आधुनिकविषयाः संस्कृतभाषया समुपवर्णिताः सन्ति। अर्वाचीनसंस्कृतसाहित्ये विषयवस्तुनः मर्यादा ईषद्

नूतनीकृता दृश्यते। समाजपुरुषाणां, सतांनां, श्रेष्ठानां चारित्र्यं काव्येषु वर्णितं प्राप्यते। एवं प्रकारेण अर्वाचीनसंस्कृतसाहित्यं वास्तविकतया अर्वाचीनम् आधुनिकं रूपं प्राप्नोत् इति वक्तुं शक्यते।

अर्वाचीनसंस्कृतसाहित्ये काव्यजगति सुविख्यातं नाम वर्तते पण्डिता क्षमादेवी राव एतस्याः। इयं महोदया प्रगल्भेन स्वीयसाहित्येन संस्कृतजगतः प्रसारं प्रचारम् अकरोत्। संस्कृतरचनापरम्परां रक्षन्ती एषा अर्वाचीनसंस्कृतसाहित्यविकास- मकरोत्। पं. क्षमादेवी राव महोदयायाः जन्म नवदशशताब्दौ अभवत्।

४ जुलै १८९९ तमे वर्षे इयं महाराष्ट्रराज्यस्य पुण्यपत्तने जन्म प्राप्तवती। एतस्याः पितुः नाम शंकर पांडुरंग पण्डित इत्येवम् आसीत्। अस्याः पिता संस्कृतभाषायाः ज्ञाता, प्रसिद्धः पण्डितः आसीत्। बाल्ये वयसि एव क्षमा राव महोदयायाः पिता दिवङ्गतः। जन्मना एव प्रगल्भा इयं विदुषी स्वीयम् अध्ययनं मुम्बईनगर्यां पूर्णमकरोत्। कुशाग्रबुद्धिमती एषा वयसः दशमे वर्षे एव लेखनकार्यम् आरब्धवती। महोदयायाः नैकासु भाषासु पाण्डित्यमासीत्। आरम्भे सा आङ्गलभाषया लेखनं कृत्वा पश्चात् विभिन्नासु भाषासु स्वीयां लेखनीं प्रसार्य वाचकान् तोषितवती। १९३० पर्यन्तम् आङ्ग्लभाषायां महोदयया बह्व्यः कथाः। बहूनि लघुनाटकानि च लिखितानि। पश्चात् १९३० तमे वर्षे महात्मागान्धी महोदयस्य सत्याग्रहप्रभावेन सा संस्कृतलेखने प्रवृत्ता। गान्धीमहोदयस्य प्रभावेन प्रेरिता इयं महोदया देशवासिनां, बान्धवानां व्यथां, पीडां 'सत्याग्रहगीता' इति काव्ये निबद्धाम् अकरोत्। अष्टादशसर्गेषु निबद्धमेतत् महाकाव्यं क्षमा राव महोदयायाः आदिमा कृतिः। ततः परं सुरभारत्या अनया बहवो ग्रन्थाः लिखिताः। १९३१ मध्ये महोदयया ''उत्तरसत्याग्रहगीता' इति अपरः काव्यग्रन्थः लिखितः। एतस्मिन् काले एव अनया सत्याग्रहनिमित्तं कस्तुरबा गान्धीसाकं गुजरातप्रान्ते अटनसमये तत्र दृक्पथमागताः शौर्यकथाः 'ग्रामज्योतिः' नाम्ना लघुकथासंग्रहे निबद्धाः। लघुकथायाः लेखनमाध्यमेन तया अर्वाचीनसंस्कृतसाहित्ये

लघुकथालेखनस्य नूत्नः पन्थाः प्रदर्शितः। एतासु कथासु तदानींतनसमस्याः, सामाजिकपरिस्थितिः च वर्णिता दृश्यते।

महात्मा गांधी महोदयस्य जीवनयात्रां, तत्कार्यं महोदयया 'सत्याग्रहगीता' काव्ये वर्णितम्। काव्यमिदं १९३२ तमे वर्षे पॅरीस नगरे प्रकाशितम्। बहिर्देशे प्रकाशनस्य कारणं तु इदमासीत् यत् तस्मिन् समये भारतदेशः पारतन्त्र्ये आसीत् तस्मात् सः कालः एतादृशकाव्यप्रकाशनाय अनुकूलः नासीत्। कालान्तरे इदमेव काव्यं १९५६ तमे वर्षे भारतदेशे मुम्बईनगर्यां प्रकाशितम् अभवत्। 'स्वराज्यविजयः' इति नाम्ना अपरमेकं काव्यं महोदयया रचितं वर्तते यस्मिन् महात्मागान्धिनः जीवनं चित्रितम्। भारतदेशस्य स्वातन्त्र्यप्राप्तिपर्यन्तं क्षमा रावमहोदया स्वीयलेखन्या देशभक्तानां चरित्राणि अवर्णयत्। स्वातन्त्र्यसंग्रामे स्वीयलेखनेन परकीयान् प्रति आक्रोशं प्रकटितवत्सु इयम् अन्यतमा। देशभक्तेः भावनां स्वीयकृतिषु प्रसार्य इयमपि स्वातन्त्र्यसेनानी इव योगदानम् अकरोत्।

संस्कृतभाषायाः पाण्डित्यं पैतृकधनरूपेण सा प्राप्तवती आसीत्। अत एव संस्कृतविषये तथा संस्कृतविदुषां विषये तस्याः महान् आदरः आसीत्। पितुः सकाशात् प्राप्तं संस्कृतवैदुष्यं सा न केवलं रक्षितवती अपि तु संस्कृतसाहित्यरचनया प्रवृद्धम् अकरोत्। पित्रा दत्तस्य संस्कृतज्ञानस्य ऋणविमोचनाय सा पितुः चरित्रं ''शङ्करजीवनाख्यानम्'' इत्यस्मिन् ग्रन्थे अलिखत्। अनेन ग्रन्थेन सा पितरं स्वीयां कृतज्ञतां प्रकाशितवती। १९३९ तमे वर्षे त्रिवेन्द्रम्, केरला इत्यत्र 'अखिल-भारतीय- प्राच्य-राष्ट्रिय-भाषा-परिषद्'' सभायां भागम् ऊढ्वा तत्रागतान् अनुभवान् व्यङ्ग्यरूपेण 'विचित्रपरिषद्यात्रा' इत्यस्मिन् ग्रन्थे अवर्णयत्।अल्पे काले एव एतावत् संस्कृतसाहित्यं विरचय्य सा समग्रे भारते ख्यातिम् अवाप्नोत्। एतस्याः एतादृशकार्यनिमित्तं १९४२ तमें वर्षे तस्याः 'साहित्यचन्द्रिका' इति बीरुदप्रदानेन सभाजनम् अभवत्।

स्वातन्त्र्योत्तरकाले इयं महोदया स्वीयलेखनस्य पन्थानं परावर्त्य स्वीयां लेखनीम् अन्यत्र प्रसारितवती। देशभक्तेः यद् ज्योतिः तेन स्वीयरचनासु प्रकाशिता आसीत् तद् ज्योर्तिः सा आध्यात्मिकदीप्तौ परिणामितवती। १९५० अनन्तरं तया स्वीयकाव्येषु साधूनां, सतांनां चरित्रवर्णनं कृतम्। परकीयानां शासनात् स्वतन्त्रैः अस्माभिः अस्माकम् आध्यात्मिकं स्वातन्त्र्यमपि अनिवार्यतया सर्वदा परिरक्षणीयमेव इति भावनया तया स्वीयरचनापाटवं सन्तसाहित्यलेखने परावर्तितं स्यात्। आध्यात्मिकी उन्नतिः एव सर्वोत्तमा। तया एव स्वतन्त्रः समाजः सामञ्जस्येन, सुखेन जीवनयापनं कर्तुं शक्नोति इति ज्ञापयितुमेव वा सा सतांः, सज्जनानां, समाजपुरुषाणां चरित्रवर्णनं कर्तुम् आरब्धवती। मीराबाई एतस्याः जीवनम् आधारीकृत्य अनया 'मीरालहरी' इति महाकाव्यं विरचितम्। महाराष्ट्रे सञ्जातस्य श्रेष्ठसतः तुकारामस्य जीवनयात्रां सा 'तुकारामचरितम्' इत्यस्मिन् महाकाव्ये वर्णितवती। समर्थरामदासस्वामिनः जीवनविषयकं 'श्रीरामदासचरितम्' इति महाकाव्यम् अलिखत् । न केवलं महाराष्ट्रस्य अपि तु समग्रस्य भारतस्य भूषणं यः वर्तते ज्ञानेश्वरः तस्य चरित्रमपि 'श्रीज्ञानेश्वरचरितम्' इत्यस्मिन् महाकाव्ये समुपावर्णयत्। सन्तसाहित्यनिर्माणे तस्य प्रचारे च अस्याः स्थानम् अर्वाचीनसंस्कृतसाहित्ये नितरां मूर्धनि स्थितं भविष्यति इति निश्चप्रचम्। सज्जनानां चरित्रवर्णनेन समाजं प्रेरितवती इयं महोदया। तत्रापि विशेषोऽयं यत् महाराष्ट्रम् 'सतां भूमि': इति उच्यते। नैके सन्तः महाराष्ट्रे जन्म प्राप्य समानतायाः सन्देशं प्रदत्तवन्तः। सामाजिकस्थितिपरिरक्षणाय एतेषां जीवनज्ञानं सर्वेभ्यः अतीव उपकारकं भविष्यति इति धिया अनया एतेषां चरित्रं संस्कृतभाषया निबद्धम्।

पण्डिता क्षमादेवी रावमहोदयया न केवलं महाकाव्यलेखने स्वीयवैदुष्यं प्रकाशितं अपि तु अनया लघुकथाः, गद्यकाव्यानि अपि विपुलतया रचितानि सन्ति। तस्याः देशभक्तिभावना, सामाजिकप्रीतिः, बान्धव्यं, स्वातन्त्र्यप्राप्तेः प्राक् रचितासु कृतिषु स्फुटतया अभिव्यक्ता दृश्यते। तदनन्तरकाले रचितासु

कृतिषु अस्याः अध्यात्मिकम् अङ्गं परिलक्षितं दृश्यते। स्वीयरचनासु तया अनतिसाधारणं बुद्धिप्रागल्भ्यं प्रदर्शितं वर्तते। अतीव सुकुमारकोमलभाषया, मनोहारिशब्दैः ललितं साहित्यं विरचय्य इयम् आधुनिकसंस्कृतसाहित्ये अग्रगण्यं स्थानं प्राप्नोति इत्यत्र नास्ति संशयः। 'साहित्यचन्द्रिका' इति यन्नाम एतस्यै प्रदत्तं तत् निश्चयेन अन्वर्थकतां प्राप्नोति।



पण्डिता क्षमादेवी राव महोदयायाः संस्कृतरचनाः

१) **सत्याग्रहगीता –** महाकाव्यम् – १९३२ वर्षे

२) **कथापञ्चकम् –** लघुकथासंग्रहः – १९३३ वर्षे

३) **शंकरजीवनाख्यानम् –** दीर्घकाव्यम् – १९३८ वर्षे

४) **उत्तरसत्याग्रहगीता –** महाकाव्यम् – १९४४ वर्षे

५) **मीरालहरी –** लघुकाव्यम् – १९४८* वर्षे

६) **श्रीरामदासचरितम् –** महाकाव्यम् – १९४९* वर्षे

७) **श्रीतुकारामचरितम् –** महाकाव्यम् – १९५० वर्षे

८) **कथामुक्तावली –** लघुकथासंग्रहः – १९५०* वर्षे

९) **ग्रामज्योतिः –** लघुकाव्यम् (लघुकथाः) १९५४ वर्षे

१०) **श्रीज्ञानेश्वरचरितम् –** महाकाव्यम् – १९५५ वर्षे

११) **स्वराज्यविजयः –** दीर्घकाव्यम् – १९६२ वर्षे

(*इत्युक्ते प्रायशः अस्मिन् काले प्रकाशितम् । अत्र काव्यप्रकाशनस्य कालः प्रदत्तः वर्तते ।)

१) सत्याग्रहगीता – 'सत्याग्रहगीता' नाम्ना रचितमेतत् काव्यं महाकाव्यम् वर्तते। १९३१ तमे वर्षे यदा पं. क्षमा रावमहोदया महात्मा गान्धिमहोदयस्य सान्निध्ये स्वातन्त्र्यसंग्रामे कार्यरता आसीत्। तस्मिन् समये काव्यस्यास्य रचनायै तया प्रेरणा प्राप्ता। महात्मगान्धिनः प्रभावेन प्रभाविता इयं स्वदेशभक्तिभावं काव्येऽस्मिन् अवर्णयत्। इदं महाकाव्यं १९३२ तमे

वर्षे पॅरीस नगरे प्रकाशितमभवत्। यत: तदानींतनकाल: एतादृशस्य काव्यस्य प्रकाशनाय अनुकूल: नासीत् पारतन्त्र्यत्वात्। पश्चात् इदमेव काव्यं महोदयाया: पुत्री लीला राव दलालमहोदया १९५६ तमे वर्षे प्रकाशितवती। इदं महाकाव्यम् अनुष्टुप्छन्दसि निबद्धं वर्तते। काव्येऽस्मिन् महात्मा गान्धिमहोदयस्य अफ्रिकागमनादारभ्य १९३९ पर्यन्तं जात: वृत्तान्त: वर्णित: अस्ति। सरलै: पद्यै: प्रसादगुणयुक्तवाण्या रचिता इयं पद्यमयी कृतिः भारतस्य तत्कालीनम् इतिहासम् अभिव्यञ्जयति।

२) कथापञ्चकम् – 'कथापञ्चकम्' नाम्ना रचितमेतत् काव्यं लघुकथासंग्रह: वर्तते। पद्येषु कथा: विरचय्य इयं महोदया कथालेखनस्य नूतनां शैलीं प्रदर्शितवती। प्रायश: संस्कृतसाहित्ये कथालेखनं गद्येष्वेव क्रियते। किन्तु अत्र अनया महोदयया सर्वा: अपि कथा: श्लोकेषु विरचिता: सन्ति। कथासंग्रहेऽस्मिन् आहत्य पञ्च कथा: सन्ति। अत एव अस्य काव्यस्य अभिधानं तया 'कथापञ्चकम्' इति कृतं विद्यते। ग्रन्थेऽस्मिन् विद्यमाना: कथा: एवं सन्ति –

१) बालिकोद्वाहसङ्कटम् – १४३ श्लोकेषु रचिता कथा।

२) गिरिजाया: प्रतिज्ञा – १४६ श्लोकेषु वर्णिता कथा।

३) हरिसिंहः – १९२ पद्येषु निबद्धा कथा ।

४) दन्तकेयूरम् – १५६ पद्येषु लिखिता कथा।

५) असूयिनी – १९५ श्लोकेषु ग्रथिता कथा।

पद्यकथासंग्रहोऽयम् १९३३ तमे वर्षे प्रकाशित: अभवत्। सरलभाषया, सुबोधवाण्या लिखिता: एता: कथा: अनुष्टुप् छन्दसि वर्तन्ते। वस्तुत: लेखिकया आदौ एता: कथा: आङ्ग्लभाषया रचिता: आसन्। तदनन्तरं संस्कृते अनुदिता: सन्ति। कथाया: अन्ते पुष्पिकासु कथासारांश: प्रदत्त: अस्ति। समाजावस्थां वर्णयन्त्य: एता: कथा: नूनं रोचका: सन्ति।

३) शंकरजीवनाख्यानम् –'शंकरजीवनाख्यानम्' इति नाम्ना रचितमेतत् काव्यं दीर्घकाव्यं वर्तते। यथा पूर्वोक्तं यत्, पं. क्षमा राव महोदया संस्कृतभाषाया: ज्ञानं पैतृकधनरूपेण प्राप्नोत्। अस्या: पिता श्रीमान् शंकरः संस्कृतभाषाया: प्रगल्भ: विद्वान् आसीत्। संस्कृतभाषायां तस्य महती श्रद्धा आसीत्। स्ववैदुष्यम् उपयुज्य स: स्वपुत्रीं संस्कृतविदुषीरूपेण अघटयत्। बाल्ये एव पं. क्षमा राव पितु: सकाशात् संस्कृताध्ययनमकरोत्। संस्कृतभाषाया: पाण्डित्यं पैतृकसम्पत्तिरूपेण इयं प्राप्तवती आसीत्। अत एव अस्या: संस्कृतविषये तथा संस्कृतविदुषां विषये महान् आदर: आसीत्। पितु: प्राप्तं संस्कृतवैदुष्यं पं. क्षमा राव न केवलं रक्षितवती अपि तु तत् संस्कृतसाहित्यरचनाव्याजेन प्रवृद्धमकरोत्। पित्रा प्रदत्तस्य संस्कृतज्ञानस्य गुरुदक्षिणारूपेण सा स्वीयपितु: चरित्रं संस्कृतभाषया एकस्मिन् दीर्घकाव्ये अवर्णयत्। तदेव काव्यं 'शंकरजीवनाख्यानम्' इति नाम्ना प्रसिद्धमस्ति। अस्मिन् महाकाव्ये लेखिकया स्वपितु: समग्रं जीवनं पद्येषु वर्णितमस्ति।१९३८ तमे वर्षे काव्यमिदं प्रकाशितम् अभवत्। एतादृशसुन्दरकाव्यस्य रचनानिमित्तं तस्यै ''साहित्य-चन्द्रिका'' इति उपाधिरपि प्रदत्तो वर्तते।

४) उत्तरसत्याग्रहगीता –'उत्तरसत्याग्रहगीता' इति नाम्ना रचितमेतत् महाकाव्यं वर्तते। अस्य काव्यस्य परिमाणं दृष्ट्वा केचन एतद् दीर्घकाव्यत्वेनाऽपि स्वीकुर्वन्ति। काव्येऽस्मिन् महात्मा गान्धिन: स्वातन्त्र्यसंग्रामस्य इतिहास: वर्णितोऽस्ति। १९३१ त: १९४४ पर्यन्तं प्रवृत्ता: सर्वा: ऐतिह्यघटना: पद्येषु निबद्धा: सन्ति। आहत्य काव्येऽस्मिन् सप्तचत्वारिंशत् (४७) अध्याया: सन्ति। काव्यस्यास्य श्लोकसंख्या द्विसहस्रं (२०००) वर्तते। समग्रमपि काव्यम् अनुष्टुप् छन्दसि रचितम् अस्ति। अस्य काव्यस्य निर्माणे काचित् कथा वर्तते यत् १९४४ तमे वर्षे भारतस्य दक्षिणप्रान्ते महात्मा गान्धिमः आश्रमस्य भिक्षुणा स्वामि निर्मलानन्देन संस्कृतकाव्यरचनाया: स्पर्धा आयोजिता आसीत्। काव्यरचनाया: विषयस्तु

तैः 'महात्मागान्धिनः सत्याग्रहः' इति प्रदत्तः आसीत्। अल्पे एव काले, केवलं पञ्चमासेषु महोदयया काव्यमेतत् विरचय्य स्पर्धानिमित्तं प्रेषितम् आसीत्। एतादृश प्रशंसनीयप्रयासनिमित्तं तया प्रथमः पुरस्कारः आसादितः। स्पर्धायाम् 'उत्तरसत्याग्रहगीता' इत्येतत् महाकाव्यं प्रथमं स्थानम् अवाप्य ताम् अनन्दयत्। १९४८ तमे वर्षे मुम्बई नगरे काव्यमेतत् प्रकाशितम् अभवत्।

५) मीरालहरी –'मीरालहरी' इति नाम्ना रचितमेतत् काव्यं लघुकाव्यरूपेण तया आरब्धम् आसीत्। किन्तु कारणवशादेतत् अल्पमात्रया समुपलभ्यते। काव्येऽस्मिन् मीराबाई इत्यस्याः कृष्णभक्तिः लेखिकया पद्येषु वर्णिता दृश्यते। सम्प्रति काव्यस्यास्य केवलम् अष्ट श्लोकाः समुपलभ्यन्ते ये शार्दूलविक्रीडितवृत्ते रचिताः विद्यन्ते।

६) श्रीरामदासचरितम्– 'श्रीरामदासचरितम्' इति नाम्ना रचितमेतत् काव्यं महाकाव्यं वर्तते। समर्थरामदासनाम्ना एकः महान् स्वामी, सन्ः महाराष्ट्रे सञ्जातः। तस्य जीवनचरित्रं, तेन कृतः उपदेशः महोदयया काव्येऽस्मिन् संस्कृतभाषया श्लोकेषु वर्णितः दृश्यते। महाकाव्येऽस्मिन् आहत्य त्रयोदशसर्गाः सन्ति। रामदासावतारः, बाललीलावर्णनम्, विरागोपक्रमः, विवाहपीठात्पलायनम्,मृतोज्जीवनः, समीरसुतसंवादः, पृथ्वीपर्यटनम्, पक्षिणीप्राणप्रत्याहरणम्, मातृदर्शनम्, महात्मसमागमः, मुनिप्रसादः, श्रीशिवराजदर्शनम्, एवं गुरुशिष्यनिर्याणम् इति त्रयोदश सर्गेषु महाकाव्यमेतत् विभक्तं वर्तते। महाकाव्येऽस्मिन् ७७६ श्लोकाः सन्ति। काव्यस्यास्य अङ्गीरसः करुणः चेत् प्रसङ्गानुगुणं वीराद्भुतादिरसाः अङ्गरूपेण वर्णिताः सन्ति। महाकाव्यलक्षणम् अस्मिन् काव्ये सर्वथा समन्वेति।

७) कथामुक्तावली–'कथामुक्तावली' नाम्ना रचितमेतत् काव्यं लघुकाव्यं वर्तते। काव्येऽस्मिन् लघुकथाः संग्रहिताः सन्ति। अस्मिन् लघुकाव्ये सर्वाः कथाः गद्येषु रचिताः सन्ति। अर्वाचीनसंस्कृतसाहित्येनापि

प्राचीनसाहित्यस्य गद्यशैली परम्परया तथैव रक्षिता वर्तते इति ज्ञापयितुमेव वा अनया एता: कथा: गद्ये रचिता: । बाणभट्टादिगद्यकवीनां ग्रन्थेषु या रचनाशैली विद्यते तामेव अनुपालयन्ती क्षमा राव महोदया स्वनैपुण्यं गद्यरचनायामपि वर्तते इति प्रदर्शितवती । 'गद्यं कवीनां निकषं वदन्ति' इत्येताम् उक्तिं समुत्तीर्य स्ववाण्या मनोहारिगद्यरचनामकरोत् ।

काव्येऽस्मिन् प्रेमरसोद्रेक:, तापसस्य पारितोषिकम्, परित्यक्ता, मिथ्याग्रहणम्, वृत्तसंसिच्छत्रम्, हेमसमाधि:, मायाजालम्, स्वप्निकव्यामोह:, नजमदिलेल:, विधवोद्वाहसङ्कटम्, क्षणिकविभ्रम:, निशिथबलि:, मस्यजीवी केवलम्, आत्मनिर्वासनम्, शरददलम् इति पञ्चदश कथा: सन्ति । सर्वास्वपि कथासु आधुनिका: समाजविषया: एव वर्णिता: । समाजे विद्यमाना: समस्या: समाजस्य पुरत: कथाव्याजेन प्रदर्शिता: सन्ति । सर्वत्राऽपि कथासु नायिकाया: मुखात् समस्या: वर्णिता: । नायिकाप्रधाना: एता: कथा: स्त्रीशिक्षणस्य महत्त्वं, प्रेम, स्नेहव्यवच्छेद:, वैधव्यम् इत्यादि समस्या: पाठकानां पुरत: उपस्थापयन्ति । सामाजिकनीतिमूल्यानि, सामञ्जस्यं, भावनाप्राधान्यादिकं कथासु विशेषतया वर्णितम् अस्ति ।

८) ग्रामज्योतिः– 'ग्रामज्योतिः' नाम्ना रचितमेतत् काव्यं लघुकाव्यं वर्तते । काव्येऽस्मिन् पद्यकथा: सङ्कलिता: सन्ति । पद्येषु लेखिकया कथा: अत्र रचिता: । आहत्य कथात्रयस्य अन्तर्भाव: काव्येऽस्मिन् कृत: वर्तते । एता: तिस्र: अपि कथा: वास्तविका: सत्यघटनाधारिता: वर्तन्ते । स्वातन्त्र्यसंग्रामे स्वदेशभक्तिं प्रदर्शितवताम् कथा अत्र वर्णिताः । ता: कथा: एवं सन्ति १) रेवाया: कथा २) कटुविपाक: एवं ३) वीरभा इति । अयं पद्यकथासंग्रह: १९५४ वर्षे प्रकाशित: आसीत् ।

९) श्रीज्ञानेश्वरचरितम्– 'श्रीज्ञानेश्वरचरितम्' इति नाम्ना रचितमेतत् काव्यं महाकाव्यं वर्तते । महाकाव्यमिदं महाराष्ट्रे प्राप्तजन्मन: सतःस्य श्रीज्ञानेश्वरस्य जीवनचरित्रमस्ति । ज्ञानेश्वरमहाराजस्य

जन्मवृत्तान्तात् आरभ्य समाधिस्वीकारपर्यन्तं समस्तजीवनमत्र वर्णितम्। काव्येऽस्मिन् अष्ट सर्गाः सन्ति। ते यथा पाणिग्रहणम्, पितृप्राणार्पणम्, शुद्धिपत्रप्राप्तिनिश्चयः, महिषवेदघोषणम्, महिषमन्त्रोच्चारणम्, ग्रन्थनिर्माणम्, श्रीचांगदेवदर्पापहरणम्, समाधिप्रवेशः इति। आहत्य ४५० श्लोकेषु काव्यमिदं ग्रथितमस्ति। अस्मिन् काव्ये भक्तिपरिपोषकः शान्तरसः प्रधानतया वर्णितः अस्ति। प्रसङ्गानुगुणं करुण - अद्भुतादि रसाः अपि तत्र तत्र वर्णिताः। अनुष्टुप्, मालिनी, मन्दाक्रान्ता, शार्दूलविक्रीडितम् इत्यादि वृत्तानां समावेशः महाकाव्येऽस्मिन् कृतः वर्तते। लेखिकायाः जीवनयात्रायाः अन्तिमकाले तया रचितोऽयं ग्रन्थः तस्याः पुत्र्या १९५५ तमे वर्षे प्रकाशं नीतः।

१०) स्वराज्यविजयः-'स्वराज्यविजयः' इति नाम्ना रचितमेतत् काव्यं दीर्घकाव्यं वर्तते। एतस्मिन् महाकाव्ये पञ्चचत्वारिंशत् अध्यायाः सन्ति। काव्यस्यास्य श्लोकसंख्याऽपि दीर्घा। अत्र १७४० श्लोकाः सन्ति। अनुष्टुप्छन्दसि रचितेऽस्मिन् काव्ये लेखिकया १९४४ तः १९४८ पर्यन्तस्य कालस्य राजकीयः इतिहासः वर्णितोऽस्ति। तदानींतनकाले जाताः राजकीयवृत्तान्ताः, घटिताः घटनाः, इतिहासः अत्र वर्णितः। काव्यमिदम् १९६२ तमे वर्षे प्रकाशितम् अभवत्।

⊖⊖⊖

तुकारामचरितम्

पण्डिता क्षमादेवी राव महोदयया रचितमिदं महाकाव्यं वर्तते। सन्तमूर्धन्यः, सज्जनश्रेष्ठः तुकारामः न केवलं महाराष्ट्रे अपि तु समग्रे भारते सुविख्यातः एव। मराठीभाषायां 'अभङ्ग' इति यः काव्यप्रकारः विद्यते तत्र अस्य अनतिसाधारणा गतिः। नैकान् अभङ्गान् (श्लोकान्) विरचय्य तुकारामः समाजे उद्बोधनम् अकरोत्। 'तुकारामगाथा' इति ग्रन्थे तुकारामस्य सर्वेऽपि अभङ्गाः (श्लोकाः) संकलिताः सन्ति ये अद्यापि महाराष्ट्रस्य जनमुखेषु विलसन्ति। भक्तेः अपूर्वं वर्णनं कृत्वा स्वाचरणेन सः समाजे उपदेशं कृतवान्। भगवतः पाण्डुरङ्गस्य ध्याने लीनः अयं जनः तथा स्वभक्तिम् मप्रादर्शयत् यया तुष्टः भगवान् स्वय एतं सदेहं वैकुण्ठम् अनयत्। भक्तिप्रचारकः अयं सज्जनः नूनं स्वजीवनं धन्यमकरोत्। आदर्शमयम् एतस्य चरित्रं समेषां पुरस्तात् उपस्थापयितुं, गीर्वाणवाण्या तत्प्रकाशयितुमेव क्षमा राव महोदयया 'तुकारामचरितम्' इति महाकाव्यं रचितम्।

अस्मिन् महाकाव्ये नवसर्गाः विद्यन्ते येषु जन्मनः आरभ्य वैकुण्ठगमनं यावत् तुकारामस्य चरितं वर्णितम्। जीवनस्य क्रमानुगुणं सर्गनामानि अपि विद्यन्ते यथा –

मूलपुरुषप्रशंसनम् – जन्मादिसंकीर्तनम् – वाणिज्यविनाशः – शकुन्तसन्तर्पणम् – दिनचर्यावर्णनम् – हरिगणेशभोजनम् – नष्टप्रत्यागमः – शिवाजीसमागमः – प्रसन्नवैकुण्ठः इति। एवं प्रकारेण नवसर्गेषु सतः तुकारामस्य जीवनयात्रा अत्र काव्ये वर्णिता। महाकाव्ये नवसर्गेषु आहत्य ४३५ श्लोकाः सन्ति। प्रायशः प्राधान्येन उपजातिवृत्ते श्लोकाः लभ्यन्ते। क्वचित् अनुष्टुप् तथा पृथ्वीवृत्तमपि दृश्यते। महाकाव्यलक्षणानुगुणं सर्गान्ते अपरस्मिन् वृत्ते श्लोकः रचितः अस्ति। भक्तिप्राधान्ये चरितेऽस्मिन् भक्तिपरिपोषकः शान्तरसः प्रमुखतया अङ्गिरूपेण वर्णितः। अङ्गरूपेण करुण – अद्भुतादिरसाः तत्र तत्र वर्णिताः सन्ति। एतादृशकाव्यस्य निर्माणेन पं.

क्षमा राव महोदयाया: भगवद् भक्ति:, सतामुपरि विद्यमाना श्रद्धा, तेषां विषयेः आदर: सुव्यक्त: भवति। श्रीतुकाराम: काव्येऽस्मिन् चरित्रनायकत्वेन वर्णित: अस्ति। महाकाव्यस्य मङ्गलाचरणे एव काव्यविषयं स्पष्टयति लेखिका। यथा –

''महाराष्ट्रेषु प्रागजनि शरदां यस्त्रिशतकात्

तुरीयो वर्णानामपि तदितरै: पूजितगुण: ।

तपस्वी निस्स्वोऽपि क्षितिपतिशिरोभ्यर्चितपद:

तुकारामस्सोऽयं जयति श्रुणुतैतस्य चरितम् ।।''

शरदां त्रिशतकात् पूर्वं महाराष्ट्रे तुरीयवर्णे जात: तथापि इतरवर्णीयै: तस्य गुणबाहुल्यात् पूजित: नरपतिभि: सेवित:, तपस्वी तुकाराम: अभवत्। स: जयति। एतस्य चरितं श्रुणुत, इत्येवं प्रकारेण सतंतुकारामं नमस्कृत्य लेखिका तच्चरित्रवर्णने प्रवृत्ता सर्वान् पाठकान् वदति यत् महानः अस्य तपस्विन: पुनीतं चरितं श्रूयताम् इति। एवं मङ्गलाचरणं विधाय अग्रे लेखिकया क्रमश: तुकारामस्य जीवनचरित्रं नवसर्गेषु निबद्धम्। एतत् महाकाव्यम् १९५० तमे वर्षे जूनमासे श्री. व्ही. कुलकर्णी महोदयेन हिंद–किताब–लिमिटेड, हॉर्न रोड, मुंबई प्रकाशनद्वारा अङ्गलानुवादेन सह प्रकाशितं वर्तते।

⊖⊖⊖

महाकाव्यलक्षणे समन्वयः

'तुकारामचरितम्' इति काव्यं पं. क्षमा राव महोदयया रचितं महाकाव्यं वर्तते। अर्वाचीनसंस्कृतसाहित्ये नवदशशतके ग्रथितम् इदं महाकाव्यं प्राचीनसंस्कृतसाहित्यस्य नियमान् नोल्लङ्घयति। प्राचीनपरम्परां, नियमान् संरक्ष्य पूर्वोक्तलक्षणानुगुणमेव लेखिकया महाकाव्यमिदं रचितम्। अत्र काव्ये महाकाव्यलक्षणे उक्ताः सर्वेऽपि अंशाः यथायोग्यम् अनुपालिताः सन्ति। संस्कृतसाहित्ये महाकाव्यलक्षणम् एवम् उक्तं –

''सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजाः बहवोऽपि वा।
शृङ्गारवीरशान्तामेकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं फलं भवेत्।।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।
नातिस्वल्पा नातिदीर्घाः सर्गाः अष्टाधिका इह।।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।
संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः

प्रातर्मध्याह्नमृगयाशैलर्तुवनसागरा:

संभोग विप्रलम्भौ च मुनिस्वर्गपुराध्वरा:

रणप्रयाणोपयममन्त्रपुत्रोदयादय:

वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह

कवेर्वृत्तस्य वा नाम्ना नायकस्तेतरस्य वा

नामास्य सर्गोपादेयकथया सर्गनाम तु ।।''

(साहित्यदपर्णम्)

महाकाव्यलक्षणस्य अस्य सारस्तु एवं भवति यत् महाकाव्यं सर्गेषु निबद्धं स्यात्। तत्र एक: सद्वंशिय:, सुरप्रवृत्तियुक्त:, धीरोदात्तगुणयुक्त: नायक: भवेत्। शृङ्गार-वीर-शान्तसु कश्चिदेक: अङ्गीरस: भवेत्। अपरे रसा: अङ्गत्वेन वर्णनीया:। महाकाव्यस्य इतिवृत्तम् इतिहासोद्भवं स्यात् अथवा सज्जनाश्रयं भवेत्। नमस्कारात्मकं, आशीर्वादात्मकं, वस्तूनिर्देशात्मकं वा मङ्गलाचरणेन काव्यारम्भ: भवेत्। न स्वल्पाः न वा दीर्घा: सर्गा: भवेयु:। न्यूनातिन्यूनम् अष्टसर्गा: महाकाव्ये भवेयु:। सर्गान्ते भिन्नवृत्ते श्लोक: स्यात् तथा भाविसर्गस्य कथाया: सूचना अपि भवेत्। महाकाव्ये सज्जनानां गुणकीर्तनं कृतं भवेत्। महाकाव्यस्य नाम नायकाधारितं, कथाधारितं वा स्यात्। विभिन्नविषयाणां वर्णनं महाकाव्ये भवेत् यथा संध्यासूर्येन्दुरजनी इत्यादि। एवं प्रकारेण महाकाव्यं रचनीयमिति लक्षणे उक्तम्।

एतद् लक्षणम् अनुसृत्यैव 'तुकारामचरितम्' इति महाकाव्यं लेखिकया विरचितम्। अत्र महाकाव्यलक्षणानुसारं कथा सर्गेषु निबद्धा अस्ति। काव्येऽस्मिन् तुकाराम: इति एक एव नायकत्वेन वर्णित:। धीरोदात्तलक्षणानुसारं तुकारामोऽपि लेखिकया उदात्तचित्तत्वेन तथा धीरत्वेन प्रदर्शित:। काव्येऽस्मिन् महाकाव्यलक्षणानुसारं शृङ्गार-वीर-शान्तसु,

शान्तरसः प्रधानत्वेन वर्णितः तस्य भक्तिपरिपोषकत्वात्। अपरे करुणाद्भुतादि रसाः अङ्गरूपेण तत्र तत्र उपयुक्ताः सन्ति। अस्य महाकाव्यस्य इतिवृत्तं सज्जनाश्रितं वर्तते। महाराष्ट्रे जातस्य संत-तुकारामस्य चरित्रमत्र वर्णितम्। नमस्कारात्मक मङ्गलाचरणेन काव्यस्य आरम्भः कृतोऽस्ति। सर्वेऽपि सर्गाः प्रायशः समाना एव सन्ति। सर्वत्राऽपि श्लोकसंख्या समाना वर्तते नाधिका न वा बहू न्यूना। आहत्य अस्मिन् काव्ये नव सर्गाः सन्ति। प्रत्येकस्मिन् सर्गे अन्तिमः श्लोकः भिन्नवृत्ते लिखितः। काव्यस्यास्य नामकरणं नायकस्य नामाधारितं वर्तते। एवं महाकाव्ये वर्णनीयाः अनुपालनीयाः सर्वेऽपि विषयाः लेखिकया यथावत् अनुसृताः सन्ति तस्मात् अर्वाचीनं सत्यपि काव्यमेतत् प्राचीनसंस्कृतसाहित्यस्य लक्षणानि अनुसरति।



प्रथमसर्गस्य सारांश:

संतपरम्पराप्राप्तस्य, संतभूमे: महाराष्ट्रस्य अध्यात्मपार्श्वभूमिपरिचाकोऽयं सर्ग:। 'तुकारामचरितम्' इति महाकाव्यस्य अस्मिन् प्रथमसर्गे योगी–तुकारामस्य मूलपुरुषस्य विश्वम्भरस्य परिचय: लेखिकया वर्णित:। अत एव सर्गस्यास्य नामकरणं 'मूलपुरुषप्रशंसनम्' इति व्यधायि।

त्रिशतं वर्षेभ्य: पूर्वं संतभूमौ महाराष्ट्रे तुकाराम नामा कश्चित् तपस्वी जनिं लेभे। य: वर्णानां तुरीयोऽपि तद् गुणवशात् इतरै: पूजित: आसीत्। नरपतिशिर: समभ्यर्चितोऽयं नि:स्वार्थी सज्जन: सर्वदा जयति अत: एतस्य जीवनयात्रां श्रुणुत इति तुकारामस्य चरित्रवर्णनमत्र समारब्धम्। तत्रादौ तुकारामकुले जातस्य तत्पूर्वजस्य चरितं वर्णयति लेखिका। विश्वम्भर – नामक: तुकारामकुलप्रपूर्व: एक: तपस्वी पुनीताया: इन्द्रायणीनद्य: तीरे देहूग्रामे वासं चकार। वाणिज्यकार्ये मग्नं तम् एकदा माता सहसा अवदत् – पुत्र ! अविलम्बं पण्ढ्रपुरीं प्राप्य भगवत: पाण्डुरङ्गस्य ध्यानं कुरु इति। मातु: वाक्यं सपद्येव गृहीत्वा तद्दिने एव स: पण्ढ्रपुरीम् अगच्छत्। तत्र प्राप्य, शुद्धासने उपविश्य निखिलेन्द्रियाणां व्यापारं निरुध्य ईश्वरसन्निधाने ध्यानमग्न: अभवत्। तदा सहस्रसूर्यसदृश: तेजपुञ्ज: इव आनन्दमूर्ति: पाण्डुरङ्ग: तद्भक्त्या प्रसन्नो भूत्वा प्रकटितोऽभूत्। उदान्तमेतं स्वगृहे निवृत्य मातरम् अवदत्। धन्यतमा सा माता तत् श्रुत्वा विस्मयपूर्णा अभवत्। एवमेव ते भक्ति: अनवरतं परेशे भवतु इत्यपि उवाच। यदा अयं वृत्तान्त: लोके प्रसृत: तदा विस्मयचकिता: आपन्नसंशया: जना: तस्योपहासम् अकुर्वन्। तेषु कश्चिदेक: दुर्जन: उपहासपूर्वकम् अब्रवीत् – अयं धनलोभी वणिक् गृहं त्यक्तुं न वाञ्छति, स्वार्थिन: अस्य विश्वम्भरनाम्न: विडम्बना एव। एतादृशखलप्रलापै: ताडितोऽपि स: विश्वम्भर: अचल: इव स्थिरो भूत्वा स्वभक्तिम् अनुवर्तयत्। पुनरेकवारं तद्भक्त्या प्रीत: पाण्डुरंग: दर्शनं

दत्वा तस्मै प्रोवाच यत् अत्र पण्ढ्रपुरं पुनरागमनेन अलम्। स्वग्रामे एव यथेष्टं माम् अचर्य इति। तस्यां निशि स्वप्ने स्वग्रामनिकटे विद्यमाने अम्बिकावने सः स्वदेवम् अपश्यत्। सपद्येव जागरितः सः अध्वगतिप्रयासम् अविचार्य प्रयाणम् आरब्धवान्। प्रातः ग्रामं प्राप्य मात्रा सह अम्बिकावनं गत्वा देवम् अन्वेष्टुमारभत तदा ताभ्यां पवित्रतुलसीसमीपे सुपुण्यवद्भिरपि न दृष्टपूर्वम्, अमूल्यभास्वत्मणिरत्नविद्धं देदीप्यमानं रुक्मिणीमाधवयोः पवित्रं मूर्तियुग्मं ददृशे। तदनु विधिवत् वेदविद्भिः विप्रैः सुगेहे मूर्तियुग्मस्य प्राणप्रतिष्ठा व्यधायि। तत्पश्चात् विश्वम्भरः शेषं निजायुषम् ईश्वरचरणे एव यापितवान्। कालेन स्वीयाम् ईहलोकयात्रां समाप्य सः मलभाण्डतुलयं देहं तत्याज। विश्वम्भरगमनानन्तरं तस्य भार्या आमा पत्युः भक्तिकार्यम् अग्रे अनयत्। निरन्तरं पाण्डुरङ्गध्याने स्थितायाः तस्याः हरिमुकुन्दौ नाम पुत्रौ पितुः स्वभावात् विभिन्नशीलौ आस्ताम्। हरिस्मरणं दूरे संस्थाप्य भौतिकसुखान्वेषणे रतौ एतौ धनलोभवशात् क्षत्रवृत्तिं प्राप्तुं राजधानीम् अगच्छताम्। तत्र कृपालु सः राजा संग्रामशिक्षाविहीनावपि एतौ सेनाधिकृतौ चकार। तत्कारणेन उद्योगाय राजधानीं प्रस्थितयोः एतयोः कृते माता अवदत् वत्स ! कोऽयं गृहत्यागस्य दुराग्रहः अत्र अस्माकं कुलदेवता निवसति। स एव सर्वान् मनोरथान् अत्रैव पूरयिष्यति तर्हि किमर्थम् अन्यत्रगमनम् ? किन्तु तद्वाक्यं व्यर्थमभवत्। द्वावपि पुत्रौ गृहं त्यक्त्वा राजधानीं जग्मतुः किन्तु माता आमा हरिसन्निधाने तथैव अतिष्ठत्।

अथ नगरीं प्राप्य अचिरात् प्रतिष्ठामवाप्य आनन्दितौ तौ स्ववधूसमेतां स्वमातरम् अनेतुं ग्रामं प्रति यानम् अप्रेषयताम् । वात्सल्यपूर्णा सा माता सुतदर्शनाय तत्रागच्छत् किन्तु तत्रस्थं सुतयोः धनित्त्वं भगवतः परोक्षे दारिद्र्यकल्पं मनुते स्म। एवं गच्छत्सु दिनेषु एकस्मिन् दिने पाण्डुरङ्गः आक्षेपवाण्या तामतर्जयत् यत् त्वत् भर्तुः भक्त्या प्रीतोऽहं देहूपुरमागतः इति किन्तु मां विहाय त्वमत्र पुत्रवात्सल्येन निवससि, मां विस्मृत्य अत्र लग्नाऽसि इति। एतत्सर्वं भ्रान्तियुतं वर्तते अतः संसारभ्रान्तिं विहाय देहूपुरं

गच्छ मां नित्यं भजस्व इति। प्रातः समुत्थिता माता पुत्रौ आहूय वृत्तान्तमेतम् अश्रावयत् किन्तु तौ उपहासम् अकुरुताम्। सा पुनः तत्रैव अवसत्। तदनु पुनरेकवारं देवः क्रुद्धो भूत्वा तामबोधयत् प्रत्यागमनाय किन्तु पुत्रौ मातुः वाक्यं न अश्रुणुताम्। अथ एकस्मिन् दिने युद्धे पुत्रयोः मरणवार्तां श्रुत्वा सा माता अवगतवती यत् वारंवारं बोधिताऽपि अहं भगवद्वाक्यं नाश्रोषम् अत एव देवः दण्डं दत्तवान्। विनष्टपुत्रायाः तस्याः एका स्नुषा कुलस्य यशसे चिताम् आरूढवती अपरा तु गर्भवती इति कृत्वा मातृगृहम् अगच्छत्। शोकाग्निदग्धा विनष्टपुत्रा सा कष्टेण देहूपुरं जगाम। तत्र सा भगवन्तम् अपृच्छत् यत् मां विनष्टपुत्रां विवशां कः त्रायते ? तदा भगवान् तवैव भक्तिः परिरक्षति त्वामिति असूचयत्। तदनु भगवतः चरणे भक्तिभावेन लीनायाः तस्याः वृद्धायाः कालक्रमेण दृष्टिरपि गता तथापि तद् गृहे सर्वं सिद्धं भवति स्म। एवं भगवद्भक्तिरता सा आमा एकस्मिन् दिने भर्तुः पदम् अवाप। तपस्विनी वृद्धायाः अवसानवार्ताम् आकर्ण्य शोकपीडिता गर्भवती स्नुषा तत्र संप्राप्ता। प्राप्य च दुःखमनुभूतवती यत् अस्मिन् वृद्धकालेऽपि भक्तियुतायाः मे श्वश्रुः सेवा मया न कृता। किन्तु लोकस्तु एवमवदत् यत् ग्रामे तु इयं वृद्धा मया स्नुषया असेवि, तर्हि मत्समरूपनारी केयं मायास्नुषा ? अथवा भगवतः इयं कृपा स्यात् इत्यादि विचिन्त्य कर्तव्यलोपवशात् सा दुःखिता अभवत्। एवं विश्वम्भरः तथा आमा यौ परमपदम् अवाप्तौ तौ तुकारामस्य कुलविटपिनोः, कुलवृक्षस्य मूलपुरुषौ आस्ताम् इति उच्यते।

''इति मूलपुरुषप्रशंसनो नाम प्रथमः सर्गः।''

⊖⊖⊖

प्रथम सर्गाचा सारांश

संतांची परंपरा लाभलेल्या महाराष्ट्रात, ख्यातनाम अशा संत तुकाराम महाराजांच्या पूर्वजांची ओळख करून देणारा हा प्रथम सर्ग.

सुमारे ३०० वर्षांपूर्वी महाराष्ट्रात जन्मलेल्या संत तुकाराम महाराजाचे चरित्र अतिशय श्रेष्ठ होय. शुद्र वर्णातील असूनही इतर वर्गांनी त्यांचा आदराने स्वीकार केला. त्यांचे पूर्वज म्हणजे, वर देणाऱ्या, केवळ स्पर्शानेच भूमीचे पावित्र्य वाढविणाऱ्या इंद्रायणी नदीकाठी वसलेल्या देहुपुरातील श्रेष्ठ संत 'विश्वंभर' हे होय. आईने सांगितलेले वाक्य गुरुवचनाप्रमाणे मानून त्यांनी मनोभावे तप केले. इंद्रिय न्रिग्रह करून, भौतिक सुखांचा त्याग करून पांडुरंगाची निस्सीम भक्ती केली. प्रामाणिकपणे केलेल्या निस्वार्थ भक्तीचे फळही त्यांना पांडुरंगाच्या साक्षात्काररूपाने मिळाले. स्वगावी परतून विश्वंभराने घडलेली, पांडुरंगाच्या साक्षात्काराची गोष्ट आईला सांगितली. हळूहळू गावात सर्वत्र ही चर्चा सुरु झाली. पण वाणिज्य व्यापार करणाऱ्या या विश्वंभरावर कुणी विश्वास ठेवला नाही, उलट त्याची थट्टाच केली. विश्वंभराने शांत चित्ताने सगळे सहन केले. त्याचा हा विश्वास पाहून पांडुरंगाने त्यांना परत एकदा साक्षात् दर्शन दिले आणि स्वत:च्या गावीच परमेश्वराची भक्ती करण्यास सांगितले. अतिशय आनंदित झालेल्या विश्वंभराने एक स्वप्न पाहिले. त्या स्वप्नात त्यांना, गावाजवळच असणाऱ्या अम्बिका नावाच्या वनात पांडुरंग शयनावस्थेत असल्याचे दिसले. ही वार्ता त्यांनी सकाळी उठून सर्वप्रथम आईला कळवली आणि भगवंताच्या दर्शनासाठी ते दोघे वनात जायला निघाले. तिथे असणारा तुळशीचा सुगंध जणू त्यांना स्वत:कडे आकर्षित करत होता. यथाशक्ती खननक्रिया सुरू असतानाच त्यांच्यापुढे दिव्य अशी सोन्याची, चकाकणारी, दैदीप्यमान विठ्ठल रुक्मिणीची मूर्ती दृष्टीस आली. या वृत्ताची सुद्धा चर्चा सर्वत्र पसरली. गावकऱ्यांनी त्यावेळी त्या मूर्तीला गावात नेऊन यथायोग्य

विधी करून, ब्राह्मणांकरवी त्या मूर्तिची प्राणप्रतिष्ठा केली.

त्यानंतर उरलेल्या आयुष्याचा, संसार सुखाचा त्याग करून उग्र तपश्चर्येद्वारे विश्वंभराने वैकुंठ प्राप्त केला. त्यांच्यामागे त्यांची पत्नी आमा आणि हरि व मुकुद नावाची दोन मुले होती पण याही सुखाचा त्यांनी त्याग केला. पत्नी आमाने पतिप्रमाणेच तपश्चर्येचे व्रत धारण केले. पण तिची मुले मात्र पित्याच्या स्वभावाच्या विरूद्ध आचरण करणारी होती. केवळ धनार्जन आणि भौतिक सुखात रमणारी होती. धनलोभाने त्यांनी सैनिकाची वृत्ती धारण केली होती. राजाश्रय मिळवला होता. आणि आता ते आपल्या आईला म्हणजे आमालाही राजधानीला चलण्यास प्रवृत्त करत होते. पण ती तयार नव्हती. सगळ्या संकटांचा संहार करणारा आपला परमेश्वर इथेच असल्याने मुलांनीही इथेच राहावे म्हणून ती मुलांना समजावत होती पण मुलांनी ऐकले नाही. वात्सल्यापोटी आमा केवळ शरीराने राजधानीला गेली पण तिचं मन मात्र परमेश्वराचरणी देहूपुरातच होतं. राजधानीला आलेल्या मातेच्या स्वप्नात तिला पांडुरंगाने कठोर वचनाने खडसावलं की तू वात्सल्यापोटी राजधानीला आलीस पण मला मात्र विसरलीस. ही घटना मुलांना सांगितल्यावर त्यांनी तिचा उपहास केला. पण त्यांना दुर्लक्षित करून ती परमेश्वराच्या भक्तीत परत ध्यानमग्न झाली.

असेच एकदा राजाचा दूत युद्धगमनाचा संदेश घेऊन घरी आला. राजाच्या संदेशाचे तत्परतेने पालन करणारे दोघे भाऊ युद्धाला गेले, परंतु रणभूमीवर धारातीर्थ झाले. तिच्या मुलांच्या मृत्युची वार्ता दोनच दिवसात तिच्या कानी आली. अतिशय दु:खी झालेली अशी ती, मुलांच्या मृत्युसाठी स्वत:ला कारणीभूत ठरवू लागली. तिने केलेल्या अपराधामुळे तिच्या मुलांची ही अवस्था झाल्याचे तिला वाटत होते. स्वत:ला कसेबसे सावरत ती देहू गावी परत आली. अतिशय दीन, वार्धक्याने थकलेली ती भगवंताला विचारू लागली की, आता माझे रक्षण कोण करेल? कारण सततच्या

रडण्याने ती अन्ध झाली होती, मुलांच्या मृत्यूमुळे ती एकाकी पडली होती, तिची एक सून सती गेली होती तर दुसरी सून गर्भवती असल्यामुळे माहेरी गेली होती पण तरीसुद्धा तिला आवश्यक त्या सर्व सोयींची व्यवस्था भगवंताने आधीच तिच्यासाठी करून ठेवली होती. म्हणूनच जेव्हा तिचा मृत्यु झाला तेव्हा तिची सून, गावातील लोकांच्या मुखातून ऐकलेल्या वाक्यांनी चकित झाली. कारण ती मातृगृही असताना इथे कुणीतरी तिची (आमाची) सेवा करत होते; जी व्यक्ति तिच्यासारखी होती. पतिप्रमाणेच श्रेष्ठ असणाऱ्या अशा सासूची तिच्या (आमाच्या) कठीणप्रसंगी सेवा करता न आल्याने सून स्वत:ला, व स्वत:च्या आयुष्याला तिटकारित होती. भगवंताच्या गाढ भक्तीने वैकुठावा प्राप्त झालेले विश्वंभर व आमा हे संत तुकारामांचे पूर्वज होते.



प्रथमः सर्गः

महाराष्ट्रेषु प्रागजनि शरदां यस्त्रिशतकात्
तुरीयो वर्णानामपि तदितरैः पूजितगुणः ।
तपस्वी निस्स्वोऽपि क्षितिपतिशिरोभ्यर्चितपद–
स्तुकारामस्सोऽयं जयति श्रृणुतैतस्य चरितम् ।।१ ।।

अन्वयः – यः शरदां त्रिशतकात् प्राक् महाराष्ट्रेषु अजनि, वर्णानां तुरीयः अपि तदितरै पूजितगुणः, तपस्वी निस्स्वोऽपि क्षितिपतिशिरोभ्यर्चितपदः सः अयं तुकारामः जयति । एतस्य चरितं श्रुणुत ।

प्रतिपदार्थः – यः = तुकारामः, शरदां – शरद्ऋतुनां, त्रिशतकात् – शतकत्रयात्, प्राक् = पूर्वं, महाराष्ट्रेषु = महाराष्ट्रप्रान्तेषु, अजनि = जनिं लेभे, वर्णानां = ब्राह्मक्षत्रियादिवर्णानां, तुरीयः = चतुर्थः, शूद्रः, अपि = तथापि, तदितरै := शूद्रेतरैः, पूजितगुणः = आराधितगुणः, तपस्वी = तपोधनः, निस्स्वोऽपि = निस्वार्थी, क्षितिपति = राजा, शिरोभ्यर्चितपदः = शिरसा वन्दितपादः, सः = तुकारामः, अयं, जयति = सर्वोत्कर्षेण वर्तते, एतस्य = तुकारामस्य, चरितं = चरित्रं, श्रुणुत = आकर्णयत ।

भावार्थः – त्रिशतं वर्षेभ्यः पूर्वं महाराष्ट्रे प्राप्तजन्मा, वर्णानां चतुर्थोऽपि (शूद्रोऽपि) शूद्रेतरैः (ब्राह्मणादिभिः) पूजितगुणः, सः तपोधनः, निस्वार्थी, नरपतिभिः शिरसा वन्दितोऽयं तुकारामः जयति । एतस्य चरित्रं श्रुणुत ।

अनुवादः – तीनशे वर्षांपूर्वी महाराष्ट्रात जन्मलेला, वर्णांमध्ये चतुर्थवर्णीय असूनही (शूद्र असूनही) इतर वर्णीयांच्या द्वारे (ब्राह्मणादिंच्या द्वारे) त्याच्या गुणांमूळे पूजिलेला, असा तपस्वी, निःस्वार्थी, राजांच्या द्वारे वंदिलेला तो तुकाराम सर्वदा वन्दनीय आहे. अशा त्या तुकारामांचे चरित्र ऐका.

इदं हि राष्ट्रं महतां मुनीनामासीत्पुरा पावनजन्मभूमिः ।

ज्ञानेश्वराद्याः किल संयमीन्द्रास्तदध्यवात्सुस्तपसां विभूत्यै ।।२ ।।

अन्वयः – पुरा इदं राष्ट्रं हि महतां मुनीनां पावनजन्मभूमिः आसीत् । ज्ञानेश्वराद्याः संयमीन्द्राः तपसां विभूत्यै किल तद् अध्यवात्सुः ।

प्रतिपदार्थः – पुरा = पूर्वकाले, इदं = एतत्, राष्ट्रं = राज्यं, हि, महतां = श्रेष्ठानां, मुनीनां = तपस्विनां, पावनजन्मभूमिः = पुण्यजन्मस्थलम् आसीत्, ज्ञानेश्वराद्या = संतज्ञानेश्वर–तुकारामादि, संयमीन्द्राः = जितेन्द्रियाः, तपसां = तपोधनानां, तपस्विनां, विभूत्यै = ऐश्वर्यवर्धनाय, उत्कर्षाय, किल तद् = महाराष्ट्रं, अध्यवात्सुः = अधिवासमकुर्वन्, निवासमकुर्वन्।

भावार्थः – पुराकाले एतत् महाराष्ट्रराज्यं श्रेष्ठानां, गरीष्ठानां तपस्विनां पुण्यजन्मस्थलमासीत्। यस्मिन् संतज्ञानेश्वरादि जितेन्द्रियाः सज्जनाः तपस्विनाम् ऐश्वर्यवर्धनाय, विभूत्यै अत्र निवासं कृतवन्तः ।

अनुवादः – पूर्वी हा महाराष्ट्रभूमी, श्रेष्ठ संताची पावनजन्मभूमी होती । ज्या पुण्यभूमीत ज्ञानेश्वरांसारख्या महान् संयमी संतांनी तपाच्या उत्कर्षाकरिता, तपरूपी ऐश्वर्यवाढीकरिता इथे निवास केला.

इन्द्रायणी यत्र वरस्रवन्ती सुरस्रवन्तीव परिस्रवन्ती ।

शिवङ्करी स्पृष्टशिवोदकानां विराजते भूरि भुवं पुनाना ।।३ ।।

अन्वयः – यत्र सुरस्रवन्तीव परिस्रवन्ती इन्द्रायणी, वरस्रवन्ती, स्पृष्टशिवोदकानां शिवङ्करी भुवं भूरि पुनाना विराजते ।

प्रतिपदार्थः – यत्र = यत्र महाराष्ट्रे, सुरस्रवन्ती इव = सुरनदी इव, परिस्रवन्ती = प्रवहन्ती, इन्द्रायणी = तन्नामकनदी, वरस्रवन्ती = वरप्रदात्री, स्पृष्टशिवोदकानां = स्पर्शमङ्गलजलानां, शिवङ्करी = मङ्गलकारी, भुवं = पृथिवीं, भूरि = भूरिशः, बहुलतया, पुनाना = पवित्रयन्ती, विराजते =

सुशोभते।

भावार्थः – यस्मिन् महाराष्ट्रप्रान्ते स्वर्गनदी, सुरगङ्गा इव प्रवहन्ती इन्द्रायणी नाम नदी, वरप्रदायिणी, या (तस्याः) मङ्गलजलस्पर्शनेन मङ्गलकारी, पृथिवीं भूरिशः पवित्रयन्ती अत्र शोभते।

अनुवादः – या महाराष्ट्रप्रान्तात स्वर्गनदी गंगेप्रमाणे वाहणारी वरप्रदायिनी इन्द्रायणी नावाची नदी, जिच्या मंगलजलस्पर्शाने मंगलप्रदान करणारी या भूमीला पवित्र करणारी अशी नदी वाहते.

तस्यां तटिन्यां पुरमस्ति देहूरिति श्रुतं यत्र चकार वासम्।
योगी तुकारामकुलप्रपूर्वो विश्वम्भरो नाम तपस्विवर्यः।।४।।

अन्वयः – तस्यां तटिन्यां देहू पुरम् अस्ति, यत्र योगी तुकारामकूलप्रपूर्वः विश्वम्भरो नाम तपस्विवर्यः वासं चकार इति श्रुतम्।

प्रतिपदार्थः – तस्यां = इन्द्रायणी नाम्ना, तटिन्यां = नद्यां, देहू = तन्नामकं, पुरं = ग्रामः, अस्ति = विद्यते, यत्र = देहूपुरे, योगी = संयमी, तुकारामकुलप्रपूर्वः = तुकारामवंशपूर्वजः, विश्वम्भरः नाम तपस्विवर्यः = तपस्वीश्रेष्ठः, वासं = निवासं, चकार = अकरोत् इति श्रुतम् = आकर्णितम्।

भावार्थः – तस्याः इन्द्रायणीनद्यः तीरे देहू नाम्ना ग्रामः वर्तते, यस्मिन् ग्रामे योगीतुकारामस्य कुलपुरुषः, पूर्वजः विश्वम्भर नामा तपस्विवर्यः निवासमकरोत् इति श्रुयते।

अनुवादः – त्या इन्द्रायणी नदीच्या काठावरती देहू नावाचे एक गाव आहे, ज्या गावात योगी तुकारामाचे पूर्वज, तपस्वी विश्वंभर यांचा निवास होता असे ऐकिवात आहे.

वाणिज्यवृत्तिं नगरे हि कुर्वन्नवाचि मात्रा सहसैष पुत्रः।
वत्साचिरात्पण्ढ्रपुरीमुपेत्य ध्यायैकचित्तेन परावरेशम्।।५।।

अन्वयः – नगरे वाणिज्यवृत्तिं कुर्वन्न हि मात्रा एषः पुत्रः सहसा

अवाचि, वत्स ! अचिरात् पण्ढ्रपुरीम् उपेत्य एकचित्तेन परावरेशं ध्याय।

प्रतिपदार्थः – नगरे = देहूग्रामे, वाणिज्यवृत्तिं = व्यापारोद्योगं, कुर्वन् = करणसमये, हि, मात्रा = विश्वम्भरमात्रा, एषः = विश्वम्भरः, पुत्रः = तनयः, सहसा = अकस्मात्, अवाचि = उक्तः, वत्स = पुत्र, अचिरात् = अविलम्बं, पण्ढ्रपुरीं = तन्नमाकनगरं, उपेत्य = प्राप्य, एकचित्तेन = एकाग्रमनसा, परावरेशं = परमेश्वरं, ध्याय = आराधय, ध्यानं कुरु।

भावार्थः – देहूनगरे एव वाणिज्यव्यापारं कुर्वन्तं विश्वम्भरं तस्य माता सहसा अवदत् यत् वत्स ! अविलम्बं पण्ढ्रपुरीं प्राप्य तत्र भगवन्तम् आराधय, ध्यानं कुरु इति।

अनुवादः– देहु गावातच वाणिज्यव्यापार करत असणाऱ्या विश्वंभरास असेच एकदा माता म्हणाली, मूला लवकर पंढरपूरला जाऊन देवाची आराधना कर.

इति प्रसूवाक्यमसौ गृहीत्वा गुरोर्वरः शिष्य इवोपदेशम्।
ययौ पुरीं तद्दिनमेव पद्भ्यां शुचिप्रदेशेऽथ कृतासनोऽभूत्।।६ ।।

अन्वयः – इति प्रसूवाक्यं गुरोर्वरः उपदेशं शिष्यः इव गृहीत्वा असौ तद्दिनमेव पद्भ्यां पुरीं ययौ। अथ शुचिप्रदेशे कृतासनो अभूत।

प्रतिपदार्थः – इति = पूर्वोक्तकथनानुसारं, प्रसूवाक्यं = जनयित्र्याः वाक्यं, गुरोर्वरः = गुरोः श्रेष्ठः, योग्यः, उपदेशम्=आदेशं, उपदेशवाक्यं, शिष्यः = गुरुशिष्यः, इव = तद्वत्, असौ = एषः विश्वम्भरः तद्दिनमेव = तस्मिन् एव दिवसे, पद्भ्यां = स्वपादाभ्यां (चलित्वा), पुरीं = पण्ढ्रपुरीं, ययौ = अगच्छत्, अथ = तदनन्तरं, शुचिप्रदेशे = शुद्धप्रान्ते, कृतासनः अभूत् = उपविष्टः ।

भावार्थः – यथा माता उक्तवती तत् श्रुत्वा, शिष्यः यथा गुरोः योग्यम् उपदेशं ध्यानेन शृणोति तथा अयं विश्वम्भरोऽपि मातुः वाक्यं

संप्रधार्य तस्मिन् एव दिने पद्भ्यां चलित्वा पण्ढ्रपुरीम् अगच्छत्। तदनन्तरं तत्र प्राप्य शुद्धप्रदेशे आसने उपविष्टवान्।

अनुवादः – ज्याप्रमाणे शिष्य गुरूचा उपदेश विचार न करता ताबडतोब अंमलात आणतो त्याप्रमाणे आईचे वाक्य ऐकून (ग्रहण करून) हा विश्वंभर त्याच दिवशी पंढरपुरला पायी चालत गेला आणि तेथे पवित्र ठिकाणी आसनस्थ झाला.

निरुध्य वृत्तिं निखिलेन्द्रियाणां निवेश्य तत्तन्निजगोलकान्तः।
निधाय चित्तं जगतामधीशे निरन्तरध्यानपरोऽयमासीत्।।७।।

अन्वयः – निखिलेन्द्रियाणां वृत्तिं निरुध्य, निवेश्य तत्तनिजगोलकान्तः, अयं जगताम् अधीशे चित्तं निधाय, निरन्तरध्यानपरः आसीत्।

प्रतिपदार्थः – निखिलेन्द्रियाणां = सर्वेषाम् इन्द्रियाणां, वृत्तिं = व्यापारं, निरुध्य = अवरुध्य, निवेश्य = निवेशयित्वा, स्थापयित्वा, तत्तनिजगोलकान्तः = इन्द्रियाणां तेषु तेषु निजगोलकेषु स्वीयलक्ष्येषु (निवेश्य), अयं = विश्वम्भरः, जगताम् = प्रपञ्चस्य, अधीशे = ईश्वरे, परमेश्वरे, चित्तं = मनः, निधाय = संस्थाप्य, योजयित्वा, निरन्तरध्यानपरः = संततं ध्यानमग्नः आसीत्।

भावार्थः – पण्ढ्रपुरीं प्राप्य कृतासनो अयं विश्वम्भरः सकलानाम् इन्द्रियाणां व्यापारं नियन्त्रयित्वा, तान् स्वीयलक्ष्येषु संयोज्य, स्वीयमनः जगदाधारभूते ईश्वरे निधाय अनवरतं ध्यानमग्नः आसीत्।

अनुवादः – आपल्या सर्व इन्द्रियांच्या व्यापारांना नियन्त्रित करून, त्यांना स्वलक्ष्यप्राप्तिकरिता त्या त्या लक्ष्यांमध्ये निवेशित करून तो विश्वंभर आपले चित्त जगाचा आधार असणाऱ्या त्या परमेश्वराच्या चरणी लावून निरन्तर ध्यान करत होता.

समाहितस्यास्य पुरः प्रकाशः सहस्रभानूपम आविरासीत् ।
आनन्दमूर्तिः स च पाण्डुरङ्गः साक्षादभूदिष्टमवाप भक्तः ।।८ ।।

अन्वयः – समाहितस्य अस्य पुरः सहस्रभानूपमः प्रकाशः आविरासीत्, सः आनन्दमूर्तिः, पाण्डुरङ्गः साक्षात् अभूत्, भक्तः इष्टं च अवाप।

प्रतिपदार्थः – समाहितस्य = संसिद्धस्य, अस्य = विश्वम्भरस्य, पुरः = पुरस्तात्, सहस्रभानूपमः = सहस्रसूर्यसमानः, तत्तुल्यः, प्रकाशः = तेजः, आविरासीत् = उत्पन्नो अभूत्, प्रकटीतोऽभूत्, सः आनन्दमूर्तिः = परमानन्दरूपः सः, पाण्डुरंगः = भगवतः विष्णोः अवतारः पाण्डुरंगः, साक्षात् अभूत् = प्रत्यक्षः अभवत्, भक्तः = तद्भक्तः विश्वम्भरः च, इष्टं = ईप्सितं, इच्छितं, अवाप = प्राप्तवान्।

भावार्थः – ध्यानमग्नस्य संसिद्धस्य अस्य विश्वम्भरस्य पुरतः सहस्रसूर्यसमानः तेजोपुञ्जः उत्पन्नः। परमानन्दस्वरूपः, आनन्दमूर्तिः, भगवतः विष्णोः अवतारः सः पाण्डुरंगः प्रत्यक्षः अभवत्। भक्तः विश्वम्भरोऽपि ईप्सितम् अवाप्नोत्।

अनुवादः – ध्यानमग्न होवून विश्वस्त झालेल्या त्या विश्वंभरासमोर हजार सूर्यांप्रमाणे प्रकाशमान असणारे एक तेजपुंज प्रकटित झाले. आनंदस्वरूप विष्णुचा अवतार असणारा तो पांडुरंग प्रत्यक्ष झाला आणि भक्ताला आपली इष्ट प्राप्ति झाली.

निवृत्य देहूपुरमात्मगेहे संवर्णयामास रहो जनन्यै ।
महाद्भुतां भागवतीं विभूतिं साक्षात्कृतां प्राग्भवपुण्ययोगात् ।।९ ।।

अन्वयः – देहूपुरं निवृत्य, आत्मगेहे रहो, प्राग्भवपुण्ययोगात् साक्षात्कृतां महाद्भुतां भागवतीं विभूतिं जनन्यै संवर्णयामास।

प्रतिपदार्थः – देहूपुरं = देहूग्रामं, निवृत्य = प्रत्यागत्य, आत्मगेहे

= स्वगृहे, रहो = रहसि, एकान्ते, प्राग्भवपुण्ययोगात् = पूर्वकृतपुण्यफलात्, साक्षात्कृतां = प्रत्यक्षीकृतां, महाद्भुतां = अत्यन्तविस्मयकारीं, भागवतीं = भगवता, विभूतिं = मूर्तिं, स्वरूपं, संवर्णयामास = अवर्णयत् ।

भावार्थ: – देहूपुरं प्रत्यागत्य स्वगृहे स: विश्वम्भर: एकान्ते, पूर्वार्जितपुण्यफलवशात् प्रत्यक्षीकृतं तत् भगवत: महाद्भुतं स्वरूपं जनन्यै अवर्णयत् ।

अनुवाद: – देहुपुरीला वापस येऊन स्वगृही एकान्तात त्या विश्वंभराने पूर्वार्जितपुण्याच्या बळावार साक्षात्कार केलेल्या भगवंताच्या त्या महान् स्वरूपाचे वर्णन आईसमोर केले.

जगाद साकर्ण्य सुदृष्टगात्री सवेपथुर्बाष्पसमाकुलाक्षी ।
अहो परं धन्यतमास्मि वत्स स्थिरास्तु ते भक्तिरियं परेशे ।।१० ।।

अन्वय: – सुदृष्टगात्री सा आकर्ण्य सवेपर्थुबाष्पसमाकुलाक्षी जगाद अहो परं धन्यतमा अस्मि । वत्स ! परेशे ते इयं भक्ति: स्थिरा अस्तु ।

प्रतिपदार्थ: – सुदृष्टगात्री = पुण्यशरीरा, सा = विश्वम्भरमाता, आकर्ण्य = श्रुत्वा सवेपथु: = सकम्पं, बाष्पसमाकुलाक्षी = अश्रुपूर्णनयना, जगाद = अवदत्, अहो, परं धन्यतमा अस्मि = सर्वथा जीवनं धन्यमभवत्, धन्या अस्मि अहम्, वत्स = पुत्र, परेशे = परमेश्वरे, ते = तव, इयं = एषा, भक्ति: = श्रद्धा, भक्तिभाव:, स्थिरा = स्थिरतया, निरन्तरया, अस्तु = भवतु ।

भावार्थ: – पुण्यशरीरा सा विश्वम्भरमाता पुत्रोक्तं वर्णनं श्रुत्वा सकम्पेन अश्रूपूर्णनयनै: अवदत् यत् हे वत्स ! अहं धन्यतमा अस्मि । तव परमेश्वरे विद्यमाना इयं भक्ति: सर्वदा एवमेव स्थिरतया भवतु ।

अनुवाद: – पुण्यशरीर ती माता हे सर्व ऐकून थरथरत्या शरीराने अश्रुपूर्ण डोळ्यांनी त्याला म्हणाली, खरच, धन्य झाले मी । मुला ! तुझी

ही परमेश्वरावरील भक्ती अशीच दृढ राहू दे.

तदीयमालोक्य सुगाढभक्तेर्महान्तमावेशमुवाच लोकः ।
बद्धादरोऽसौ यदि पाण्डुरङ्गे तदन्तिके तिष्ठति किं न नित्यम् ।।११ ।।

अन्वयः – तदीय सुगाढभक्तेः महान्तम् आवेशम् आलोक्य लोकः उवाच, यदि असौ पाण्डुरङ्गे बद्धादरः (तर्हि), तदन्तिके नित्यं किं न तिष्ठति ?

प्रतिपदार्थः – तदीय = तस्य, सुगाढभक्तेः = दृढभक्तेः, गहनभक्तिभावस्य, महान्तं = महनीयं, आवेशम् = वर्णनम्, स्वरूपम् आडम्बरम्, आलोक्य = दृष्ट्वा, लोकः = जनः, उवाच = अकथयत्, यदि असौ = एषः पाण्डुरङ्गे = भगवति पाण्डुरङ्गे, बद्धादरः = आदरयुक्तः (तर्हि) तदन्तिके = तस्य अन्तिके, समीपे, नित्यं = सर्वदा, किं = किमर्थम्, न, तिष्ठति = वसति ।

भावार्थः – तस्य विश्वम्भरस्य सुदृढभक्तेः तादृशं महान्तं परिणामं, स्वरूपं दृष्ट्वा लोकः अवदत् यत् यदि एषः पाण्डुरङ्गे तावत् आदरयुक्तः अस्ति तर्हि किमर्थं तस्य समीपे सर्वदा न तिष्ठति ?

अनुवादः – त्या विश्वंभराच्या गाढभक्तीला पाहून लोक म्हणाले की जर हा पांडुरंगाच्या भक्तीत एवढा लीन झालेला आहे तर मग नेहमी त्याच्याजवळच हा का राहत नाही, का थांबत नाही ?

जगाद कश्चित्पिशुनः सहासं वणिक्किलायं धनलाभदृष्टिः ।
कुक्षिम्भरिर्नेच्छति वेश्म हातुं विश्वम्भराख्यास्य विडम्बनैव ।।१२ ।।

अन्वयः – कश्चित् पिशुनः सहासं जगाद, अयं धनलाभदृष्टिः वणिक् किल ? कुक्षिम्भरिः वेश्म हातुं न इच्छति। विश्वम्भराख्यास्य विडम्बना एव।

प्रतिपदार्थः – कश्चित् = कोऽपि एकः, पिशुनः = दुर्जनः, सहासं

= हास्यसहितं, जगाद = अवदत्, अयं = विश्वम्भरः, धनलाभदृष्टिः = वित्तलाभदृष्टिः किल, कुक्षिम्भरिः = उदरपूरकः (स्वार्थी), वेश्म = गृहं, हातुं = त्यक्तुं, न, इच्छति = वाच्छति, विश्वम्भरः = विश्वं भरति, पालयति इति विश्वम्भरः, तदाख्यस्य = तन्नाम्ना, विडम्बना = अवहेलना एव।

भावार्थः – कोऽपि दुष्टः उपहासेन उवाच यत् अयं विश्वम्भरः धनलोभी व्यापारी खलु। उदरपूर्तये रतः स्वार्थी अयं गृहं त्यक्तुं नेच्छति। विश्वम्भरः इति अस्य यन्नाम वर्तते तत्तु नाम्नः विडम्बना एव।

अनुवादः – कोणी एक दुर्जन म्हणाला की, हा तर धनलोभी व्यापारी आहे, स्वतःचे पोट भरू इच्छिणारा हा घराचा त्याग करू इच्छित नाही. याचे नाव विश्वंभर आहे ती एक विडंबनाच आहे. (स्वतःचे पोट भरू इच्छिणारा, विश्वंभर म्हणजे विश्वाचे पोट कसे भरू शकेल?)

खलप्रलापैर्बहुताडितोऽपि प्रशान्तधीरेष निशम्य चैतान्।
अनेडमूकः स्थितवानकम्पः प्रचण्डवात्याहतशैलतुल्यः ॥१३॥

अन्वयः – खलप्रलापैः बहु ताडितः अपि एषः प्रशान्तधीः एतान् निशम्य च, अनेडमूकः, प्रचण्डवात्याहतशैलतुल्यः अकम्पः स्थितवान्।

प्रतिपदार्थः – खलप्रलापैः – दुर्जनवचोभिः, बहु = बहुधा, अधिकतया, ताडितः = प्रताडितः, पीडितः, अपि = तथापि,ः प्रशान्तधीः = शान्तबुद्धिः चैतान् = च + एतान् जनान्, निशम्य = श्रुत्वा, अनेडमूकः = न इडः न मूकः इव, अनेडमूकः इव, अचलतया, प्रचण्डवात्याहतन = भीषणः वायुनापीडितः, शैलतुल्यः = पर्वतसदृशः, अकम्पः = विनाकम्पं, अचलतया, स्थितवान् = अतिष्ठत्।

भावार्थः – दुर्जनवाक्यैः बहुधा पीडितोऽपि शान्तचित्तः अयं विश्वम्भरः कर्णौ पिधाय, एतान् जनान् श्रुत्वा अनेडमूकः इव अर्थात् न

मूकः न वा बधिर इव अचलतया, भीषणवायूना आहतः पर्वतः इव

स्थिरतया तत्र अतिष्ठत्।

अनुवाद: – दुष्टांच्या वचनांनी अनेकप्रकारे त्रासूनही हा शान्तबुद्धी असणारा विश्वंभर कान बंद करून, इन्द्रियनिग्रह करून वादळच्या आघाताने प्रताडित होऊनही निश्चल, स्थिर राहणाऱ्या पर्वतासारखा स्थिर निश्चल उभा होता.

श्रीपाण्डुरङ्गस्तपसा प्रसन्नः प्रादुर्बभूवास्य पुनः पुरस्तात्।
दीप्तानलार्कद्युतिमेष दृष्ट्वा पादारविन्दे न्यपतत्सकम्पः ।।१४।।

अन्वयः – तपसा प्रसन्नः श्रीपाण्डुरंगः पुनः अस्य पुरस्तात् प्रादुर्बभूव। एषः दीप्तानलार्कद्युतिं दृष्ट्वा पादारविन्दे सकम्पः न्यपतत्।

प्रतिपदार्थः – तपसा = तपश्चर्यया, तपोबलेन, प्रसन्नः = तुष्टः, श्रीपाण्डुरंगः = श्रीविठ्ठलः, पुनः = पुनरेकवारं, अस्य विश्वम्भरस्य, पुरस्तात् = प्रत्यक्षं, प्रादुर्बभूव = प्रकटितः अभवत्। एषः = विश्वम्भरः, दीप्तानल = प्रकाशिताकाश, अर्कद्युतिं = सूर्यप्रकाशं, दृष्ट्वा = वीक्ष्य, पादारविन्दे = श्रीपाण्डुरंगचरणकमले, सकम्पः = सवेपथुः, न्यपतत् = अपतत्।

भावार्थः – सत्यपि दुर्जनविरोधे कृततपश्चर्याबलेन, तपश्चर्यया सन्तुष्टः श्रीपाण्डुरंगः पुनरेकवारम् अस्य विश्वम्भरस्य प्रत्यक्षं प्रकटितो अभूत्। तस्य पाण्डुरंगस्य आकशव्याप्तसूर्यमिव दीप्तिं दृष्ट्वा विश्वम्भरः तस्य पाण्डुरंगस्य चरणकमले सवेपथुः नतमस्तकः अभवत्।

अनुवाद: – दुर्जनांच्या विरोधाकडे लक्ष न देता केलेल्या तपश्चर्येमुळे संतुष्ट झालेला पाण्डुरंग पुन्हा एकदा विश्वंभरासमोर प्रकटत झाला. आकाशव्यापी सूर्याच्या तेजस्वी कान्तीप्रमाणे दिसणाऱ्या त्या तेजाला पाहून कंपयुक्त तो विश्वंभर पाण्डुरंगाच्या चरणकमलांवर नतमस्तक झाला.

स चाह विस्मेरविलोचनं तं प्रीतोऽस्मि भक्त्या मयि ते महत्या।
अलं तवात्रागमनेन भूयः स्वग्राम एवार्चय मां यथेष्टम्।।१५।।

अन्वयः – सः च विस्मेः अविलोचनं तं आह, मयि ते महत्या भक्त्या प्रीतोऽस्मि। तव अत्र भूयः आगमनेन अलम्। स्वग्रामे एव मां यथेष्टम् अर्चय।

प्रतिपदार्थः – सः = पाण्डुरंगः, च, विस्मेः = आश्चर्यकारणेन, अविलोचनं = निर्निमेषदृष्टिं, तं = विश्वम्भरं, आह = उवाच, मयि = पाण्डुरंगे ते = तव विश्वम्भरस्य, महत्या = अत्याधिकया, भक्त्या = श्रद्धया, भक्तिभावेन, प्रीतोऽस्मि = आनन्दितः अस्मि। तव = विश्वम्भरस्य, अत्र = पण्ढ्रपुर्यां, पुनः वारंवारं, आगमनेन = अत्रागमनेन, अलं = पर्याप्तम्, स्वग्रामे एव = स्वीयदेहूपुरे एव, मां = पांण्डुरंगं, यथेष्टं = यथेप्सितम्, अर्चय = पूजय।

भावार्थः– आश्चर्येन निर्निमेषं पश्यन्तं तं विश्वम्मरं पाण्डुरङ्गः अवदत्, मयि विद्यमानया तव अगाढभक्त्या अहं सन्तुष्टः अस्मि। वारंवारं तव अत्र आगमनेन अलम्। स्वग्रामे एव मां यथेष्टं पूजय।

अनुवादः – आश्चर्यचकित दृष्टीने पाहणाऱ्या त्या विश्वंभराला श्रीपाण्डुरंग म्हणाले, माझ्यावर असणाऱ्या तुझ्या या अगाढ भक्तीने मी प्रसन्न झालो आहे. वारंवार इथे पंढरपूरला येणे खूप झाले ते पुरे कर, थांबव, आणि स्वतःच्या गावी देहूपुरातच यथेष्ट माझी आराधना कर.

निपीय वाक्यामृतमञ्जुधारां सुष्वाप हर्षार्णवमग्नचेताः।
स्वप्ने ददर्श स्वपुरान्तिकस्थे वनेऽम्बिकाख्ये शयितं स्वदेवम्॥१६॥

अन्वयः – हर्षार्णवमग्नचेताः वाक्यामृतमञ्जुधारां निपीय सुष्वाप। स्वप्ने स्वपुरान्तिकस्थे अम्बिकाख्ये वने स्वदेवं शयितं ददर्श।

प्रतिपदार्थः – हर्षार्णवः = आनन्दसागरः तस्मिन् मग्नचेताः = निमग्नमनः, (सः) वाक्यामृतमञ्जुधारां = वचनामृतवाणीं, सुधा इव मंजुलवाणीं, निपीय = पीत्वा (श्रुत्वा), सुष्वाप = निद्रितवान्। स्वप्ने = स्वप्ने, निद्रावस्थायां, स्वपुरान्तिकस्थे = स्वग्रामनिकटस्थे, अम्बिकाख्ये

= अम्बिकानाम्ना, वने = अरण्ये, स्वदेवं = स्व-आराधकं, पाण्डुरङ्गं, शयितं = शयानं, निद्रितं, ददर्श = दृष्टवान्, अपश्यत्।

भावार्थः – श्रीपाण्डुरङ्गस्य मञ्जुलं वचनामृतं निपीय (श्रुत्वा) सः आनन्दसागरे निमग्नः विश्वम्भरः निद्रितवान्। निद्रायां, स्वप्ने स्वग्रामसमीपे विद्यमाने अम्बिकानाम्ना वने स्वदेवं पाण्डुरङ्गं शयितं दृष्टवान्।

अनुवाद :– पांडुरंगाच्या वचनामृतानी आनंदसागरात निमग्न झालेला तो विश्वंभर सुखाने झोपी गेला. स्वप्नात गावाजवळच्या अंबिका वनात त्याने स्वदेवाला झोपलेले पाहिले.

क्षणात्प्रबुद्धस्तमसि प्रगाढे स्खलन्नगाधोत्कलिकाप्रणुन्नः ।
ययौ निजग्रामटिकां विदूरामचेतयन्नध्वगतिप्रयासम् ।।१७ ।।

अन्वयः – क्षणात् प्रबुद्धः प्रगाढे तमसि अध्वगतिप्रयासम् अचेतयन् अगाधोत्कलिकाप्रणुन्नः स्खलन् विदूरां निजग्रामटिकां ययौ ।

प्रतिपदार्थः – क्षणात् = तस्मिन् क्षणे एव, प्रबुद्धः = जागरितः, प्रगाढे = घने, भीषणे, तमसि = अन्धकारे, अध्वगतिः = मार्गगमनं, प्रयासं = परिश्रमं, कष्टं, अचेतयन् = अविगणय्य, अगणयन्, अगाधोत्कलिकाप्रणुन्नः =पाषाणस्खलितः , स्खलन् = प्रस्खलन्, विचलन्, विदूरा = सुदूरां, निजग्रामटिकां = स्वग्रामं, ययौ = अगच्छत्, गतवान् ।

भावार्थः – स्वप्नं वीक्ष्य तस्मिन्नेव क्षणे जागरितः सः विश्वम्भरः रात्रौ घनान्धकारे प्रयाणपरिश्रमं, मार्गकष्टम् अविचार्य, अगाधपाषाणखण्डैः प्रताडितः, स्खलितः सुदूरां स्वग्रामस्थलीम् अगच्छत्।

अनुवादः – स्वप्न पाहून त्याच क्षणी जागा झालेला तो विश्वंभर, रात्रीच्या घनान्धकारामध्ये दगडांना अडखळत, दूरवर असलेल्या आपल्या गावाकडे मार्गात येणाऱ्या कष्टांचा विचार न करत निघाला.

प्रातर्गृहं प्राप्य वनं प्रतस्थे मात्रान्वितः केशवदर्शनाय ।
अन्विष्यमाणोऽपि स पाण्डुरङ्गो न क्वापि तद्दृष्टिपथं जगाम ।।१८ ।।

अन्वयः – प्रातः गृहं प्राप्य मात्रान्वितः केशवदर्शनाय वनं प्रतस्थे । सः पाण्डुरंगः अन्विष्यमाणः अपि क्वापि तत् दृष्टिपथं न जगाम ।

प्रतिपदार्थः – प्रातः = प्रभाते, गृहं = सदनं, प्राप्य = समागत्य, मात्रान्वितः = मात्रा सह, केशवदर्शनाय = श्रीपाण्डुरङ्गदर्शनाय, वनं = अम्बिकावनं, प्रतस्थे = प्रस्थितवान् । सः पाण्डुरंगः = पूर्वं स्वप्ने दृष्टः पाण्डुरंगः, अन्विष्यमाणः = गवेष्यमाणः अपि, क्वापि = कुत्रापि तत् = तस्य विश्वम्भरस्य, दृष्टिपथं = दृक्गोचरं न, जगाम् = अगच्छत्।

भावार्थः – स्वप्नं वीक्ष्य सपैद्येव रात्रौ प्रस्थितः विश्वम्भरः प्रातः काले गृहं समागत्य मात्रा सह श्रीपाण्डुरंगदर्शनाय अम्बिकावनं प्रस्थितवान् । स्वप्ने दृष्टः सः पाण्डुरंगः गवेष्यमाणोऽपि न कुत्रापि दृग्गोचरः अभवत्।

अनुवादः – स्वप्नात पाहिल्याप्रमाणे रात्रीच घराकडे निघालेला विश्वम्भर सकाळी घरी पोहचला. तेथून आईला सोबत घेऊन अम्बिका वनात पाण्डुरंगाच्या दर्शनाकरिता निघाला. परंतु खूप शोधूनही तो स्वप्नात पाहिलेला पांडुरंग त्याच्या दृष्टीस पडला नाही.

क्वचित्स्थलीं दृष्टिविलोभनीयामपश्यतां तौ तुलसीपवित्राम् ।
यतो वहन् धूपमनोज्ञगन्धः समाजुहावेव समीपमेतौ ।।१९ ।।

अन्वयः – तौ दृष्टिविलोभनीयां क्वचित्स्थलीं तुलसीपवित्राम् अपश्यताम् । यतः धूपमनोज्ञगन्धः वहन् एतौ समीपं समाजुहौ इव ।

प्रतिपदार्थः – तौ = विश्वम्भरः तथा माता, तौ, दृष्टिविलोभनीयां = दर्शनाकृष्टां, द्रष्टुं सुन्दरां, क्वचित् = कुत्रचित्, स्थलीं = उपवनभूमिं तुलसीपवित्रां = पावनतुलसीं, अपश्यताम् = दृष्टवन्तौ, यतः यस्मात् पवित्रतुलस्येः धूपमनोज्ञगन्धः = मनोहारिसुगन्धः, वहन् = प्रवहन्, एतौ =

विश्वम्भरः तथा मातरं, समीपं = स्वनिकटं, समाजुहौ = समाहूतवन्तौ इव।

भावार्थः – बहुधा अन्वेषणानन्तरम् अम्बिकावने तौ नयनरम्यां क्वचित् उपवनभूमिं अपश्यताम्, यत्र पवित्रतुलसी स्वमनोहारिगन्धेन एतौ निकटं समाह्वयन्ती इव आसीत्।

अनुवादः – खूप शोधल्यानंतर त्या अम्बिकावनात, नयनरम्य जागेत स्वतःच्या मनोहारि सुगन्धाने त्या दोघांना जणु बोलावित असणारे पवित्र तुळशीचे रोप त्या दोघांनी पाहिले.

भूगर्भलीनः करुणानिधिः स्यादत्रैव मन्दार इवाब्धिलीनः।
गवेषणीयो भगवानिहैवेत्युवाच पुत्रं जननी बहुज्ञा ।।२० ।।

अन्वयः – मन्दारः अब्धिलीनः इव करुणानिधिः अत्रैव भूगर्भलीनः स्यात्। भगवान् इहैव गवेषणीयः इति बहुज्ञा जननी पुत्रम् उवाच।

प्रतिपदार्थः – मन्दारः = मन्दारवृक्षः, स्वर्गवृक्षः, अब्धिलीनः = सागरलीनः, सागरतले लीनः, इव = तद्वत्, करुणानिधिः = दयासागरः, पाण्डुरंगः, अत्रैव = अत्र (तुलसीसमीपे) एव, भूगर्भलीनः = भूमिगर्भलीनः, भूमेः अधः, स्यात् = भवेत्, (तस्मात्), भगवान् = श्रीपाण्डुरंगः, इहैव = अत्रैव (तुलसीसमीपे), गवेषणीयः = अन्वेषणीयः, इति = इत्येवंप्रकारेण, बहुज्ञा = विदुषी, जननी = माता, पुत्रं = अपत्यं, विश्वम्भरम्, उवाच = अवदत्।

भावार्थः – यथा स्वर्गवृक्षः मन्दारः समूद्रे लीनः आसीत् तथा दयासागरः श्रीपाण्डुरंगः अत्रैव पवित्रतुलसीनिकटे भूमेः अधः निगूढः भवेत् अतः अस्मिन् एव स्थले (तुलसीनिकटे एव) सः अन्वेषणीयः इति विदुषी, सर्वज्ञा माताः पुत्रं विश्वम्भरम् अवदत्।

अनुवादः – ज्याप्रमाणे स्वर्गलोकातील वृक्ष मन्दार हा समुद्राच्या

तळात दडलेला होता त्याप्रमाणे दयायुक्त असणारा हा पांडुरंग इथेच या पवित्र तुळसीजवळ जमिनीच्या खाली दडलेला असावा म्हणून त्या ईश्वराला पांडुरंगाला इथेच (तुळशीजवळ) शोधायला हवे असे सर्वज्ञ असणारी ती माता पुत्रास विश्वंभरास म्हणाली.

आकाशवाण्येव तया प्रयुक्तो यावत्स भक्त: खनति क्षमान्त: ।
तावत्तयोर्दृक्पथमेति किंचित्सुपुण्यवद्भिश्च न दृष्टपूर्वम् ।।२१ ।।

अन्वय: – आकाशवाण्या इव तया प्रयुक्त: स: क्षमान्त: भक्त: यावत् खनति, तावत् सुपुण्यवद्भि: च न दृष्टपूर्वं किञ्चित् तयो: दृक्पथम् एति ।

प्रतिपदार्थ: – आकाशवाण्या = अशरीरवाचा, इव = तद्वदिव, तया = मात्रा, प्रयुक्त: = प्रेरित:, प्रचोदित:, स: = विश्वम्भर:, क्षमान्त: = क्षमाशील:, सहनशील:, क्षमा=भुमिः, तस्या=अन्त, भूमिः अद्यः, भक्त: = श्रद्धालु:, भक्तियुत:, यावत् = यदा, खनति = कर्षयति, तावत् = तदा, सुपुण्यवद्भि: = महानपुण्यशालिजनै:, बहुसुकृतयुक्तै:, मनुष्यै:, च = अपि, न दृष्टपूर्वं = न अवलोकितपूर्वं, किञ्चित् = किमपि(अलौकिकं तत्त्वम्), तयो: = माताविश्वम्भरयो:, दृक्पथम् = दृष्टिगोचरम्, एति = गच्छति ।

भावार्थ: – अशरीरवाचा इव मातु: वचनेन प्रेरित: स: क्षमावान् भक्त: भूमेः अधः विश्वम्भर: यावत् खनति तावत् बहुकृतपुण्यवद्भिरपि पूर्वम् अनवलोकितं, न कदापि दृष्टपूर्वं किञ्चित तत्त्वं माताविश्वम्भरयो: दृग्गोचरं भवति ।

अनुवाद: – आकाशवाणीप्रमाणे आईच्या वचनांनी प्रेरित झालेला तो क्षमाशील भक्त विश्वंभर जसा तिथे जमिनीखाली खोदावयास लागला; तशी तेवढ्यात पुण्यवान लोकांनीही कधीही न पाहिलेली अशी गोष्ट त्या दोघांच्या समोर आली.

भूगर्भलीनं ददृशे हि ताभ्याममूल्यभास्वन्मणिवृन्दनद्धम्।
देदीप्यमानं शुभमूर्तियुग्मं श्रीरुक्मिणीमाधवयोः पवित्रम्।।२२ ।।

अन्वयः – ताभ्यां भूर्गभलीनम् अमूल्यभास्वत् मणिवृन्दनद्धं, देदीप्यमानं श्रीरुक्मिणी माधवयोः पवित्रं शुभमूर्तियुग्मं ददृशे।

प्रतिपदार्थः – ताभ्यां = ताभ्यां द्वाभ्यां, माताविश्वम्भराभ्यां, भूगर्भलीनं = भूम्याः उदरे लीनं, भूमिगर्भे स्थितं, अमूल्यभास्वत् = बहुमूल्ययुक्तं, प्रकाशितं, मणिवृन्दनद्धं = रत्नमणिसमूहे निबद्धं, रत्नसमूहे व्याप्तं, देदीप्यमानं = प्रकाशमानं, दीप्तियुक्तं, श्रीरुक्मिणीमाधवयोः = रुक्मिणीपाण्डुरंगयोः पवित्रं, पावनं, शुभमूर्तियुग्मं = मंगलविग्रहयुगलं, ददृशे = दृष्टम्।

भावार्थः – ताभ्यां माताविश्वम्भराभ्यां तत्र भूमेः अधः, गर्भे स्थितं अमूल्यरत्नसमूहैः व्याप्तं, प्रकाशमानं रुक्मिणीपाण्डुरङ्गयोः पावनं मूर्तियुगलं दृष्टम्।

अनुवादः – त्या दोघांनी तिथे जमिनीत दडलेल्या अमूल्य रत्नांच्या समूहांनी व्याप्त असलेल्या कांतियुक्त प्रकाशमान होणाऱ्या रुक्मिणीपांडुरंगाच्या पवित्र मूर्ती पाहिल्या.

अत्यद्भुतं वृत्तमिदं सुपुण्यं सर्वत्र लोके बहुलीबभूव।
इन्द्रायणीरोधसि मूर्तियुग्मं न्यवेशि तत्सापि कृता पवित्रा।।२३ ।।

अन्वयः – अत्यद्भुतं सुपुण्यं वृत्तमिदं लोके सर्वत्र बहुलीबभूव। इन्द्रायणी रोधसि तत् मूर्तियुग्मं न्यवेशि, सा अपि पवित्रा कृता।

प्रतिपदार्थः – अत्यद्भुतं = अतीव आश्चर्यकारि, सुपुण्यं = सुकृतं, पुण्यकारि, वृत्तमिदं = वृत्तान्तोऽयं, घटना इयं, घटितमिदं, लोके = प्रपञ्चे, जगति, सर्वत्र, बहुलीबभूव = बहुलतया अभवत्, प्रचारितमतभवत्। इन्द्रायणीरोधसि = इन्द्रायणीनद्याः तीरे, तत् मूर्तियुग्मं = प्राप्तं विग्रहयुगलं,

न्यवेशि = अस्थापि, स्थापितम्, सा = इन्द्रायणी अपि (तेन), पवित्रा कृता = पावनीकृता।

भावार्थः – भूगर्भलीनं रुक्मिणीमाधवयोः मूर्तियुग्मम् अम्बिकावने प्राप्तमिति वृत्तान्तोऽयं प्रपञ्चे सर्वत्र प्रचारितः अभवत्। तत् विग्रहयुगलम् इन्द्रायणी नद्यः तीरे स्थापितं तेन सा इन्द्रायणी नदी अपि पवित्रमूर्तेः सम्पर्कवशात् पावनीकृता।

अनुवादः – अम्बिकावनात रुक्मिणीपांडुरंगाची मूर्ती मिळाली ही गोष्ट सर्वत्र प्रसरली झाली. त्या मूर्तीला इन्द्रायणी नदीच्या काठी ठेवल्याने ती नदी सुद्धा पवित्रमूर्तीच्या संपर्काने पावन झाली.

न्यधायि सा पौरजनैः सुगेहे विभोः सजानेस्तपनीयमूर्तिः।
व्यधायि विप्रैरथ वेदविद्भिः। प्राणप्रतिष्ठा विधिवद्विधिज्ञैः ।।२४।।

अन्वयः – पौरजनैः सजानेः विभोः सा तपनीयमूर्तिः सुगेहे न्यधायि। अथ विधिज्ञैः, वेदविद्भिः विप्रैः विधिवत् प्राणप्रतिष्ठा व्यधायि।

प्रतिपदार्थः – पौरजनैः = नागरिकैः, सजानेः = सपत्न्याः, विभोः = ईश्वरस्य, पाण्डुरंगस्य, सा = वने प्राप्ता, तपनीयमूर्तिः = प्रकाशमानमूर्तिः, देदीप्यमानः विग्रहः, सुगेहे = उत्तमगृहे, शुचिप्रदेशे, न्यधायि = स्थापिता। अथ = तदनन्तरं, मूर्तिस्थापनानन्तरं, विधिज्ञैः = शास्त्रविद्भिः, वेदविद्भिः = वेदज्ञानवेत्तारैः, विप्रैः = ब्राह्मणैः, विधिवत् = शास्त्रानुगुणं, नियमानुगुणं, प्राणप्रतिष्ठा = प्राणसंस्थापनक्रिया, प्राणप्रतिष्ठासंस्कारः, व्यधायि = कृता।

भावार्थः – नागरिकैः वने प्राप्तायाः सपत्नीकायाः पाण्डुरंगस्य प्रकाशमानमूर्तेः स्थापना उत्तमगृहे कृता। तदनु शास्त्रवेत्तारैः ब्राह्मणैः शास्त्रानुगुणं तत्र प्राणप्रतिष्ठा कृता।

अनुवादः – गावातील नागरिकांनी पत्नीसहित असणाऱ्या त्या पांडुरंगाच्या मूर्तीची स्थापना उत्तम ठिकाणी केली. त्यानंतर शास्त्रसंपन्न व

वेदपारंगत असलेल्या ब्राह्मणांनी शास्त्रानुसार त्यात प्राणप्रतिष्ठा केली.

पादारविन्दे किल विश्वमूर्तेः व्यावृत्तसंसारसुखोपभोगः ।
निनाय विश्वम्भर एष शेषं निजायुषो नित्यतपोभिरुग्रैः ।।२५ ।।

अन्वयः – व्यावृत्तसंसारसुखोपभोगः एषः विश्वम्भरः विश्वमूर्तेः पादारविन्दे किल उग्रैः नित्यतपोभिः शेषं निजायुषः निनाय ।

प्रतिपदार्थः – व्यावृत्त = निवृत्त, संसारसुखं = प्रापञ्चिकसुखम्, आनन्दः, उपभोगः = आस्वादः, भौतिसुखेच्छातः निवृत्तः विश्वम्भरः, विश्वमूर्तेः = जगदीश्वरमूर्तेः पाण्डुरंगविग्रहस्य, पादारविन्दे = चरणकमले किल, उग्रैः = कठोरैः, नित्यतपोभिः = नियमितव्रतादिभिः, नित्यतपश्चर्यया, शेषम् = अविशिष्टं, निजायुषः = स्वीयजीवनं, निनाय = अनयत्।

भावार्थः – प्राणप्रतिष्ठायाः अनन्तरं सांसारिसुखोपभोगात् निवृत्तः एषः विश्वम्भरः संसारसुखेच्छां विहाय जगदीश्वरस्य पाण्डुरंगस्य चरणकमले कठोरव्रतादिभिः नित्यतपश्चर्यादि आचरणेन अवशिष्टं स्वजीवनं नीतवान् (यापितवान्) ।

अनुवादः – प्राणप्रतिष्ठेनंतर, समस्त भौतिक सुखांमधून निवृत्त झालेल्या, संसारसुखांचा त्याग केलेल्या त्या विश्वंभराने स्वतःचे उर्वरित आयुष्य विश्वस्वरूप त्या पांडुरंगाच्या चरणी नित्यकठोरव्रतांच्या आचरणाने तपस्येत घालविले.

तपोधनः केशवलोककामी समाप्य सर्वामिहलोकयात्राम्।
भार्याममाख्यां तनयौ च हित्वा तत्याज देहं मलभाण्डतुल्यम् ।।२६ ।।

अन्वयः – केशवलोककामी तपोधनः सर्वाम् इहलोकयात्रां समाप्य आमा आख्यां भार्यां, तनयौ च हित्वा मलभाण्डतुल्यं देहं तत्याज ।

प्रतिपदार्थः – केशवलोककामी = केशवलोकः = वैकुण्ठः, तत्कामी = तत्प्राप्तेच्छुकः, तपोधनः = तप एव धनं यस्य सः, विश्वम्भरः, सर्वां =

समग्राम्, इहलोकयात्रां = भूलोकयात्रां, समाप्य = पूरयित्वा, आमा आख्यां = आमा नाम्ना, भार्यां = पत्नीं, तनयौ = द्वौ पुत्रौ च, हित्वा = त्यक्त्वा, मलभाण्डतुल्यं = अवकरकण्डोलसदृशं, देहं = शरीरं, तत्याज = त्यक्तवान्।

भावार्थः – वैकुण्ठलोकप्राप्तेच्छुकः तपस्वी सः विश्वम्भरः समग्रां स्वभूलोकयात्रां समाप्य आमा नाम्ना पत्नीं तथा पुत्रौ विहाय मलभाण्डसदृशं शरीरं व्यक्तवान् अर्थात देहत्यागम् अकरोत्।

अनुवादः – वैकुण्ठगमनाची इच्छा असणाऱ्या त्या तपस्वी विश्वंभराने आपली भूलोकयात्रा संपवून आमा नावाची आपली पत्नी व दोन मुलांना इथेच सोडून मलभाण्डाप्रमाणे असणाऱ्या शरीराचा त्याग केला.

दिवंगते भर्तरि पुण्यपुञ्जे वियोगशोकाग्निनितान्तदग्धा ।
आमा निवृत्ताखिलभोगचिन्ता ध्यानामृतेनैव पुपोष देहम्।।२७ ।।

अन्वयः – पुण्यपुञ्जे भर्तरि दिवंगते वियोगशोकाग्निनितान्तदग्धा अखिलभोगचिन्ता निवृत्ता आमा ध्यानामृतेन एव देहं पुपोष ।

प्रतिपदार्थः – पुण्यपुञ्जे = सुकृतसमूहे, पुण्यस्वरूपे, पुण्यात्मनि, भर्तरि = नाथे, दिवंगते = स्वर्गं गते सति, वियोगशोकाग्निनितान्तदग्धा = विरहदुःखानलेन सर्वथा दग्धा ज्वलिता, अखिलभोगचिन्ता = समग्रसुखोपभोगचिन्ता निवृत्ता = व्यावृत्ता, परावृत्ता, आमा = विश्वम्भरपत्नी, ध्यानामृतेन = ईश्वरस्मरणरूपी अमृतेन एव, देहं = स्वशरीरं, पुपोष = पोषितवती ।

भावार्थः – पुण्यात्मनि भर्तरि स्वर्गं गते सति विरहदुःखानलेन सर्वथा दुःखिता सा आमा सर्वसुखोपभोगचिन्तां निर्वर्त्य, समाप्य, केवलम् ईश्वरस्मरणरूपी ध्यानामृतेन एव स्वशरीरं संवर्धितवती ।

अनुवादः – पुण्यस्वरूप पतीच्या स्वर्गलोकगमनानंतर वियोगदु:खाच्या ज्वालेनी दग्ध झालेल्या, दु:खी झालेल्या त्या आमाने सर्व सांसारिक उपभोगांची चिंता सोडून केवळ भगवत् स्मरणरूपी अमृताने स्वशरीराला जोपासले.

हरिर्मुकुन्दश्च सुतौ प्रकृत्या पितुः स्वभावात्प्रविभिन्नशीलौ।
हरिस्मृतिं दूरत एव कृत्वा भोगाशयाकृष्टहृदावभूताम्।।२८।।

अन्वयः – प्रकृत्या पितु: स्वभावात् प्रविभिन्नशीलौ सुतौ हरिर्मुकुन्दश्च हरिस्मृतिं दूरत एव कृत्वा भोगाशयाकृष्टहृदौ अभूताम्।

प्रतिपदार्थः – प्रकृत्या = स्वभावेन, पितु: = स्वपितु: विश्वम्भरस्य, स्वभावात् = प्रकृत्या, शीलात्, प्रविभिन्नशीलौ = विभिन्नस्वभावौ, विरुद्धस्वभावौ, सुतौ = पुत्रौ, हरिर्मुकुन्दश्च् = हरि: तथा मुकुन्द: इति नाम्ना विश्वस्मरपुत्रौ, हरिस्मृतिं = ईश्वरस्मरणं, दूरत एव कृत्वा = सुदूरे संस्थाप्य, दूरं कृत्वा, भोगाशयाकृष्टहृदौ = उपभोगादिषु आकृष्टचित्तौ, भौतिकसुखेषु आकृष्टौ, अभूताम् = जातौ, आस्ताम्।

भावार्थः – निसर्गत: एव पितु: विश्वम्भरस्य स्वभावात् विरुद्ध स्वभावौ, भिन्नप्रवृत्तीयुक्तौ पुत्रौ हरि: मुकुन्दश्च भगवत्स्मरणं तद्भक्तिं दूरे एव संस्थाप्य केवलं संसारसुखेषु आसक्तौ आस्ताम्।

अनुवादः – निसर्गत: वडिलांच्या स्वभावाविरुद्ध प्रवृत्ती असणारे विश्वंभराचे पुत्र हरि आणि मुकुन्द (दोघेही) ईश्वरस्मरणाला, भगवद्भक्तीला दूरच ठेवून केवळ इहलोकातील उपभोगात आकृष्टचित्त होते, भौतिक गोष्टीत त्यांचे मन रमलेले होते.

आमा तु माता पतिवत्तपस्यां श्रद्धावती चक्रधरे चचार।
धनार्जनोपायविधिं तु पुत्रौ परस्परं चिन्तयतः स्म नित्यम्।।२९।।

अन्वयः – श्रद्धावती माता आमा तु पतिवत् चक्रधरे तपस्यां चचार।

पुत्रौ तु नित्यं धनार्जनोपायविधिं परस्परं चिन्तयत: स्म।

प्रतिपदार्थ: – श्रद्धावती = श्रद्धायुता, भक्तिपूर्णा, माता = अम्बा, आमा= विश्वम्भरपत्नी, तु, पतिवत् = पति: इव, नाथ: इव, विश्वम्भरवत्, चक्रधरे = विष्णौ, पाण्डुरंगे, तपस्यां = तपश्चर्यां, चचार = आचरितवती, आचरत्, पुत्रौ = हरिमुकुन्दौ, तु = परन्तु, नित्यं = सर्वदा, धनार्जनोपायविधिं = वित्तोपार्जनमार्गं, धनप्राप्ति उपायं, परस्परं = अन्योन्यं, चिन्तयत: स्म = चिन्तयन्तौ आस्ताम्।

भावार्थ: – विश्वम्भरस्य वैकुण्ठगमनानन्तरं तस्य भक्तिपूर्णा श्रद्धायुता पत्नी आमा तु तमिव भगवति तपश्चर्याम् आचरति स्म अर्थात् विश्वम्भर इव तपस्यायां मग्ना आसीत्, किन्तु तत्पुत्रौ हरिमुकुन्दौ सर्वदा परस्परं धनार्जनोपायं चिन्तयत: स्म।

अनुवाद: – विश्वंभराच्या वैकुण्ठगमनानंतर त्याची पत्नी, हरि व मुकुन्दाची माता आमा ही भक्तिभावाने श्रद्धेने पतिसारखी त्या ईश्वराची तपश्चर्या करत असे. परंतु तिचे पुत्र हे नेहमी धनप्राप्तीच्या उपायांची चर्चा परस्पर करत असत.

क्षत्रस्य वृत्तिं यदि संश्रयावस्तदा भवेदस्मदभीष्टसिद्धि:।
इत्याशया देशमहीपतेस्तावुद्योगकामौ ययतु: सकाशम्॥३०॥

अन्वय: – यदि क्षत्रस्य वृत्तिं संश्रयाव: तदा अस्मद् अभीष्टसिद्धि: भवेत् इति आशया उद्योगकामौ तौ देशमहीपते: सकाशं ययतु:।

प्रतिपदार्थ: – यदि, क्षत्रस्य = क्षत्रियस्य, सैनिकस्य, वृत्तिं = उद्योगं, उपजीविकां, संश्रयाव: = आश्रयाव:, स्वीकुर्व:, तदा = तर्हि, अस्मद् = आवयो: हरिमुकुन्दयो:, अभीष्टसिद्धि: = ईप्सितप्राप्ति: (धनार्जनप्राप्ति:) भवेत् = भविष्यति, इति आशया = इच्छया, कामनया, उद्योगकामौ = उद्योगप्राप्तेच्छुकौ, उपजीविकावाञ्छकौ, तौ = हरिमुकुन्दौ, देशमहीपते: = देशस्य = प्रान्तस्य, महीपते: = राज्ञ:, सकाशं = समीपं,

ययतुः = अगच्छताम्, गतवन्तौ ।

भावार्थः – परस्परं नित्यं धनार्जनमार्गं विचिन्तयतः एतौ हरिमुकुन्दौ चिन्तितवन्तौ यत्, यदि सैनिकस्य उद्योगं प्राप्नुवः तर्हि अस्माकम् ईप्सितं धनार्जनादिकं फलितं भविष्यति इति कामनया उद्योगप्राप्तये उत्सुकौ तौ देशस्य राज्ञः समीपं गतवन्तौ ।

अनुवादः – नेहमी धनप्राप्तीचे उपाय चिन्तिणाऱ्या त्या दोघांनी असा विचार केला की, जर आपण सैनिकाची नौकरी मिळविली तर आपल्या मर्जीप्रमाणे सर्व काही साध्य होईल म्हणजे धनप्राप्ती सिद्ध होईल म्हणून या आशेने नोकरी मिळविण्याच्या इच्छेने ते दोघे देशाच्या राजाकडे गेले.

असौ महीन्द्रः शरणागतानां मनोरथस्वर्गमहीरुहेन्द्रः ।
संग्रामशिक्षाविधुरावपीमौ चकार सेनाधिकृतौ कृपालुः ।।३१ ।।

अन्वयः – शरणागतानां मनोरथस्वर्गमहीरुहेन्द्रः असौ महीन्द्रः संग्रामशिक्षाविधुरौ अपि इमौ सेनाधिकृतौ चकार ।

प्रतिपदार्थः – शरणागतानां = शरणम् आगतानां, अभ्यागतानां, मनोरथः = इच्छा, स्वर्गमहीरुहेन्द्रः = स्वर्गलोके विद्यमानः रुहः वृक्षः इव अर्थात् कल्पवृक्ष इव, असौ = एषः, तद्देशीयः, कृपालुः = दयालुः, महीन्द्रः = राजा, संग्रामशिक्षा = युद्धशिक्षा, समरशिक्षा, विधुरौ अपि = रहितौ अपि एतौ = हरिमुकुन्दौ सेनाधिकृतौ = सेनायांम् अन्तर्भावितौ, चकार = कृतवान्, अकरोत्।

भावार्थः – शरणागतानां मनोरथान् यथा स्वर्गवृक्षः कल्पवृक्षः पूरयति तद्वत् कल्पवृक्ष इव विद्यमानः एषः दयावान् राजा युद्धशिक्षारहितौ एतौ सेनायां प्रवेशितवान्। अर्थात कृपावान् तद्देशीयः राजा युद्धज्ञानरहितान् एतौ सेनायां सैनिकरूपेण स्वीकृतवान् इति ।

अनुवादः – शरणागतांचे मनोरथ पूर्ण करणाऱ्या स्वर्गातील कल्पवृक्षाप्रमाणे असणाऱ्या त्या कृपाळू राजाने युद्धाचे ज्ञान नसलेल्या प्रशिक्षणरहित असणाऱ्या या दोघांना सेनेमध्ये स्थान दिले, त्यांना सैनिकांची नोकरी दिली.

तयो: प्रसू: केशवनामतुष्टा पराङ्मुखी लौकिकवित्तभोगे।
प्रस्थानमन्यत्र निवारयन्ती सुवत्सला तौ निजगाद पुत्रौ ।।३२ ।।

अन्वयः – लौकिकवित्तेभोगे पराङ्मुखी, केशवनामतुष्टा, सुवत्सला तयो: प्रसू: अन्यत्र प्रस्थानं निवारयन्ती तौ पुत्रौ निजगाद।

प्रतिपदार्थः – लौकिकवित्तभोगे = सांसारिकधनोपभोगे, पराङ्मुखी = अनासक्ता, व्यावृत्तवदना, केशवनामतुष्टा = विष्णुनामस्मरणे आनन्दिता, पाण्डुरङ्गनामस्मरणतुष्टा, सुवत्सला = वात्सल्ययुक्ता, ममतापूर्णा, तयो: = हरिमुकुन्दयो:, प्रसू: = जनयित्री, माता, अन्यत्र = इतरत्र, स्वग्रामं त्यक्त्वा इतरत्र, प्रस्थानं = प्रयाणं निर्गमनं, निवारयन्ती = विरोधयन्ती, व्यावर्तयन्ती, तौ पुत्रौ = हरिमुकुन्दौ (तयो: कृते) निजगाद = अवदत्, उवाच।

भावार्थः – सांसारिक धनोपभोगेषु, भौतिकसुखेषु अनासक्ता, भगवत: नामस्मरणे सन्तुष्टा, ममतायुक्ता हरिमुकुन्दयो: माता आमा तयो: ग्रामं त्यक्त्वा इतरत्र गमनं विरोधयन्तीं तौ एवम् आह

अनुवादः – सांसारिक धनप्राप्ती, उपभोगादिंमध्ये अनासक्त भगवंताच्या नामस्मरणाने संतुष्ट होणारी त्या दोघांची जननी आमा त्यांचे गाव सोडून इतरत्र होणारे प्रस्थान थांबविण्याकरिता म्हणाली –

किमित्ययें वत्स हरे मुकुन्द दुराग्रहो वां पुरमेव हातुम्।
इहास्ति विष्णु: कुलदेवता न: कल्पद्रुम: सर्वमनोरथानाम् ।।३३ ।।

अन्वयः – अये वत्स हरे ! मुकुन्द ! किम् इति वां पुरमेव हातुं

दुराग्रहः ! सर्वमनोरथानां कल्पद्रुमः नः कुलदेवता विष्णुः इह अस्ति ।

प्रतिपदार्थः – अये = अरे, वत्स = पुत्र, हरे, मुकुन्द ! किमिति = किं वा इति, केन कारणेन वा, वां = युवयोःवां, पुरमेव = स्वग्राममेव, हातुं = त्यक्तुं, दुराग्रहः = दुष्टः आग्रहः, हठः, सर्वमनोरथानां = सर्वेप्सितानां, कल्पद्रुमः = कल्पवृक्षः, नः = अस्माकं–न, कुलदेवता = वंशदेवता, विष्णुः = श्रीपाण्डुरंगः, इह = अत्र देहूग्रामे, अस्ति = विद्यते ।

भावार्थः – माता अवदत् यत्, अरे पुत्र हरे! मुकुन्द ! केन कारणेन युवयोः अयं स्वग्रामत्यागस्य हठः वर्तते ? किमर्थं स्वग्रामं त्यक्तुं दुराग्रहं कुरुतः ? सर्वेच्छापूरकः कल्पवृक्ष इव अस्माकं कुलदेवता श्रीपाण्डुरंगः अत्रैव अस्ति ।

अनुवादः – त्यांची आई म्हणाली, अरे बाळाहरि! मुकुन्दा ! का, बरे तुमचा हा गाव सोडून जाण्याचा हट्ट आहे ! का बरे हा दुराग्रह ? सर्व मनोरथांना पूर्ण करणाऱ्या कल्पवृक्षाप्रमाणे असणारी आपली कुलदेवता श्रीपांडुरंग इथेच आहे.

अलं विदेशभ्रमणेन लोभान्मा विस्मृतिर्भूज्जगदीश्वरस्य ।
यदीयकल्याणपदाब्जसेवा वज्रायते विश्वविपद्गिरीणाम्।।३४ ।।

अन्वयः – विदेशभ्रमणेन अलम् ! लोभात् जगदीश्वरस्य विस्मृतिः मा भूत् । यदीयकल्याणपदाब्जसेवा विश्वविपद्गिरीणां वज्रायते ।

प्रतिपदार्थः – विदेशभ्रमणेन = परदेशगमनेन, अन्यत्रगमनेन, अलं = पर्याप्तम्, लोभात् = लोभवशात्, मोहवशात्, जगदीश्वरस्य = परमेश्वरस्य पाण्डुरंगस्य, विम्सृतिः = विस्मरणं, मा भूत् = न भवेत्, यदीय = यस्य, पाण्डुरंगस्य, कल्याणपदाब्जसेवा = मंगलपदसेवा विश्वविपत् = सर्वसङ्कटरूपी, गिरीणां = पर्वतानां, वज्रायते = वज्रमिव आचरति, नाशं करोति इत्यर्थः ।

भावार्थः – हे वत्स ! अन्यत्रगमनेन अलम् । मोहवशात् परमेश्वरस्य विस्मरणं मा भवतु । यस्य चरणकमलसेवा हि विश्वसंकटरूपीपर्वतानां वज्रमिव नाशनं करोति अर्थात् यस्य सेवा संकटनाशिनी वर्तते तं मा विस्मरताम्।

अनुवादः – हे मुलांनो, इतरत्र जाणे पुरे करा. मोहपाशात अडकून त्या परमेश्वराचा विसर पडू देऊ नका.ज्याची चरणकमलसेवा ही वज्राप्रमाणे सर्वसंकटरूपी पर्वतांचा नाश करते.

इहैव भक्त्या हरिसंनिधाने यथा गुरुर्वां जनकः स्थितोऽभूत्।
तथा युवाभ्यामपि वर्तितव्यं स एव धर्मः स च सिद्धिहेतुः ।।३५ ।।

अन्वयः – यथा वां: गुरु: जनक: इहैव भक्त्या हरिसन्निधाने स्थित: अभूत्, युवाभ्यामपि तथा वर्तितव्यम् । स एव धर्म:, स च सिद्धिहेतु: ।

प्रतिपदार्थः – यथा वां: = युवको: वा:, गुरु: = श्रेष्ठ:, जनक: = पिता, इहैव = अत्रैव, स्वग्रामे देहूपुरे एव, भक्त्या = भक्तिभावनया हरिसन्निधाने = ईश्वरनिकटे, पाण्डुरङ्गसान्निध्ये, स्थित: अभूत् = अतिष्ठत्, स्थितवान्, युवाभ्यामपि = युवाभ्यां हरिमुकुन्दाभ्याम् अपि, तथा = तथैव, वर्तितव्यं = व्यवहर्तव्यम्, आचरणीयम्, स एव धर्म: = तदेव युष्माकं कर्तव्यं, स: धर्म:, स च सिद्धिहेतु: = तदेव सिद्धिकारणम्, स्वसिद्धये निमित्तम् इति ।

भावार्थः – यथा युवयो: पिता विश्वम्भर: अत्रैव स्वग्रामे भक्तिभावेन ईश्वरनिकटे अतिष्ठत् तथैव युवाभ्याम् अपि आचरणीयम् । वस्तुत: अत्र भक्त्या आचरणमेव युवयो: धर्म:, कर्तव्यम् । तदेव युवयो: सिद्धिकारणम् अर्थात् जीवनस्य सिद्धिप्राप्त्यर्थं निमित्तमपि तदेव अस्ति इति ।

अनुवाद :– ज्याप्रमाणे तुम्हा दोघांचे वडिल इथेच स्वतःच्या गावी ईश्वराजवळ राहात होते त्याचप्रमाणे तुम्ही सुध्दा असेच वागयला हवे म्हणजे इथे रहायला हवे. तोच तुमचा धर्म आहे तेच तुमच्या सिध्दीचे

कारण आहे.

एतावदुक्त्वा विरराम माता वचस्तु तस्याः हुतमप्सु जातम्।
त्यक्त्वा पुरं जग्मतुरेव दूरे महीपतेस्तस्य हि राजधानीम्।।३६ ।।

अन्वयः – माता एतावत् उक्त्वा विरराम। तस्याः वचस्तु अप्सु हुतं जातम्। पुरं त्यक्त्वा दूरे तस्य महीपतेः राजधानीं जग्मतुः एव।

प्रतिपदार्थः – माता = जननी, आमा, एतावत् = पूर्वोक्तं तावत्, उक्त्वा = कथयित्वा, विरराम = विरामं स्वीकृतवती,स्ववाचम् अस्थगयत्, तस्याः = मातुः आमायाः, वचस्तु = वचनानि परंतु, उपदेशवाक्यानि तु, अप्सु = जले, हुतं = आहूतम् इव हविषः इव, जातम् = अभवत्। पुरं = स्वग्रामं, त्यक्त्वा = जहीत्वा, दूरे = सुदूरे तस्य महीपतेः = तद्देशीयराज्ञः, राजधानीं = राजनगरीं, जग्मतुः एव = अगच्छताम् एव, गतवन्तौ एव।

भावार्थः – पूर्वोक्तवचनानि, उपदेशवाक्यानि कथयित्वा माता आमा विरामं स्वीकृतवती, स्ववाणीम् अस्थगयत् किन्तु तस्याः वचः जले प्रदत्ता आहूतिः इव व्यर्थम् अभवत्। तौ पुत्रौ स्वग्रामं त्यक्त्वा सुदूरे तद्देशीयराज्ञः नगरीं गतवन्तौ एव।

अनुवादः – पूर्वोक्ताप्रमाणे बरेच काही समजावून, एवढ्या कथनानंतर तिने आपल्या वाणीला विराम दिला परंतु तिने सांगितलेली सर्व वचने पाण्यात दिलेल्या आहुतीप्रमाणे व्यर्थ ठरली. ते दोघे दूर असलेल्या त्या राजधानीला गेले.

प्राप्तप्रतिष्ठौ नचिरादभूतां संभाव्यमानौ नृपतेः प्रसादात्।
ग्रामं प्रति प्राहिणुतां च यानमानेतुमम्बां स्ववधूसमेतान् ।।३७ ।।

अन्वयः – नृपतेः प्रसादात् नचिराद् प्राप्तप्रतिष्ठौ संभाव्यमानौ अभूताम्। स्ववधूसमेताम् अम्बाम् आनेतुं ग्रामं प्रति यानं प्राहिणुताम्।

प्रतिपदार्थः – नृपतेः = राज्ञः, प्रसादात् = कृपया, आशीर्वादात्,

नचिराद् = अचिरात्, शीघ्रमेव, प्राप्तप्रतिष्ठौ = आसादितगौरवौ, प्राप्तसन्मानौ, संभाव्यमानौ = विचार्यमाणौ, आदरपूर्णौ, अभूताम् = जातौ, असञ्जायेताम्, स्ववधूसमेतां = स्वपत्नीसहितां, अम्बां = जननीं, आनेतुं = समानेतुं, ग्रामं प्रति = देहूपुरं प्रति, यानं = प्रवहनं, प्राहिणुताम् = अप्रेषयताम्, प्रेषितवन्तौ।

भावार्थः – सेनायां स्थानं प्राप्य राज्ञः कृपाशिर्वादेन शीघ्रमेव तौ हरिमुकुन्दौ प्रतिष्ठाम् अवाप्य आसादितगौरवौ सञ्जातौ। तदनु तौ स्वपत्नीसमवेतां मातरं तत्र राजधानीम् आनेतुं देहूपुरं प्रति प्रवहणं प्रेषितवन्तौ।

अनुवादः – राजाकडे नोकरी मिळवून त्या राजाच्या कृपेने लवकरच ते दोघे प्रतिष्ठा, सन्मान प्राप्त करून आदरयुक्त झाले. त्यानंतर आपल्या पत्नीसह आईला तिथे राजधानीला आणण्याकरिता देहू गावाकडे त्यांनी एक गाडी पाठविली.

वात्सल्यदोषात्सुतदर्शनाय निरुद्धबाष्पा नृपराजधानीम्।
सा देहमात्रेण जगाम गेहान्निधाय चेतो भगवत्पदाब्जे ।।३८ ।।

अन्वयः – वात्सल्यदोषात् सुतदर्शनाय, भगवत्पदाब्जे चेतः निधाय निरुद्धबाष्पा सा देहमात्रेण गेहात् नृपराजधानीं जगाम।

प्रतिपदार्थः – वात्सल्यदोषात् = ममतादोषात्, सुतदर्शनाय = पुत्रदर्शनाय, पुत्रवीक्षणाय, भगवत्पदाब्जे = ईश्वरचरणकमले, चेतः = मनः, निधाय = स्थापयित्वा, निरुद्धबाष्पा = नियन्त्रित अश्रुः, सा = आमा, देहमात्रेण = केवलं शरीरेण न तु मनसा, गेहात् = गृहात्, नृपराजधानीं = राज्ञः नगरीं, जगाम = अगच्छत्, गतवती।

भावार्थः – प्राप्तप्रतिष्ठौ मे पुत्रौ माम् आनेतुं यानं प्रेषितवन्तौ इति कारणेन ममताभाववशात् वात्सल्यकारणेन सा माता आमा पुत्रदर्शनाय, भगवतः चरणकमले मनः संस्थाप्य, अश्रुपूर्णा सा केवलं शरीरेण न तु

मनसा, गृहात् बहिः नृपराजधानीम् अगच्छत्।

अनुवादः – माझी मुले खूप मोठी झाली आहेत व त्यांनी मला घेऊन जाण्याकरिता गाडी पाठविली आहे. या कारणाने ममतापूर्ण, वात्सल्यमयी ती माता भगवंताच्या चरणी आपले मन ठेवून केवळ शरीरानेच अश्रूंना सावरत मुलांच्या भेटीकरिता घरातून बाहेर राजधानीला निघाली.

मेने यथा निर्धनतामपि स्वां विभोः समक्षं महतीं विभूतिम् ।
सा तत्परोक्षे सुतयोर्धनित्वं दारिद्र्यकल्पं मनुते स्म माता ।।३९ ।।

अन्वयः – स्वां निर्धनतामपि यथा विभोः समक्षं महतीं विभूतिं मेने। (किन्तु) सा माता तत्परोक्षे सुतयोः धनित्वं दारिद्र्यकल्पं मनुते स्म।

प्रतिपदार्थः – स्वां = स्वकीयां, निर्धनताम् अपि = धनरहिताम् अवस्थां, दारिद्र्यमपि, यथा = येन प्रकारेण, विभोः = परमेश्वरस्य, समक्षं = पुरस्तात्, महतीं = बहु अधिकां, विभूतिं = सम्पत्तिं, मेने = अचिन्तयत् (किन्तु), सा = आमा, माता = जननी, तत्परोक्षे = तस्य ईश्वरस्य पृष्टतः, अप्रत्यक्षतया, सुतयोः = पुत्रयोः, धनित्वं = समृद्धिं, दारिद्र्यकल्पं = दारिद्र्यतुल्यं, निर्धनतुल्यं, मनुते स्म = चिन्तयति स्म।

भावार्थः – तत्र राजधानीं गत्वा सा माता, यथा स्वीयां निर्धनतां, दारिद्र्यमपि भगवतः पाण्डुरंगस्य पुरस्तान् महतीं समृद्धिं, महद् ऐश्वर्यं, इति अचिन्तयत् (किन्तु) तत्परोक्षे अर्थात् श्रीपाण्डुरंगस्य अप्रत्यक्षतया, तदभावे पुत्रयोः ऐश्वर्यं दारिद्र्यसमानं चिन्तयति स्म। अर्थात् श्रीपाण्डुरंगसहवास एव प्रमुखः इति तद्वचनमासीत्।

अनुवादः– स्वताःच्या दरिद्रतेला सुध्दा भगवंताच्या समोर ज्याप्रमाणे मोठे ऐश्वर्य मानत असे अशा त्या मातेला भगवंताच्या पाठीमागे पुत्रांची सम्पत्ती दारिद्र्यासमान वाटत होती.

ऐश्वर्ययोगाद्विमुखी स्थितैषा विचिन्तयन्ती सततं महेशम् ।

ददर्श साक्षादथ पाण्डुरङ्गं स चाक्षिपन् वाचमिमां बभाषे ।।४० ।।

अन्वयः – ऐश्वर्यभोगात् विमुखी एषा सततं महेशं विचिन्तयन्ती स्थिता, साक्षात् पाण्डुरंङ्गं ददर्श । स च आक्षिपन् इमां वाचं बभाषे ।

प्रतिपदार्थः – ऐश्वर्यभोगात् = समृद्धिसुखोपभोगात्, विमुखी = पराङ्मुखी, एषा = माता आमा, सततं = निरन्तरं, नित्यं, महेशं = परेशं, पाण्डुरंगम्, विचिन्तयन्ती = विचारं कुर्वती, स्थिता = विद्यमाना, साक्षात् = प्रत्यक्षं, पाण्डुरंगं = श्रीविठ्ठलं, ददर्श = दृष्टवती, अपश्यत्, स च आक्षेपं कुर्वन्, आरोपयन् एवं वचनमाह ।

भावार्थः– पुत्रयोः गृहे सुखोपभोगात् पराङ्मुखी एषा माता निरन्तरं पाण्डुरङ्गं चिन्तयति स्म । अथ कदाचित्(स्वप्ने) श्रीविठ्ठलः तया साक्षात् दृष्टः । सःच आक्षेपं कुर्वन् एतत् उक्तवान् ।

अनुवादः – मुलांच्या घरी, समृद्धी, ऐश्वर्यादि उपभोगांपासून विमुख, विरक्त असणारी ती माता नित्य श्रीविठ्ठलाची आठवन, त्याचे स्मरण करत असे. तेव्हा अचानक (स्वप्नात) साक्षात् श्रीविठ्ठलाला तिने पाहिले आणि तो आक्षेप घेत बोलु लागला ।

जानासि देहूपुरमागतोऽहं त्वद्भर्तुराराधनतः प्रसन्नः ।
पुत्राभिषंगात्ममतानिमग्ना लग्नासि मद्विस्मृतिकर्दमे त्वम् ।।४१ ।।

अन्वयः– त्वद् भर्तुः आराधनतः प्रसन्नः अहं देहूपुरम् आगतः (इति) जानासि । ममतानिमग्ना त्वं पुत्राभिषङ्गात् मद्विस्मृतिकर्दमे लग्ना असि ।

प्रतिपदार्थः – त्वद् = तव, भर्तुः = पत्युः विश्वम्भरस्य, आराधनतः अर्चनाकारणेन, भक्तिभावेन, प्रसन्नः = सन्तुष्टः, अहं = श्रीविठ्ठलः, देहूपुरं = देहूग्रामं, आगतः = समागतः (इति) जानासि = अवधारयसि । ममतानिमग्ना = वात्सल्यपाशे निमग्ना, पाशबद्धा, त्वं = आमा, पुत्राभिषङ्गात् = पुत्रस्नेहवशात्, मद्विस्मृतिकर्दमे = ममविस्मरणे, श्रीविठ्ठलविस्मरणरूपी कर्दमे = पङ्के, लग्ना = अवसिक्ता असि ।

भावार्थः – प्रत्यक्षतया प्रकटितः श्रीपाण्डुरंगः आमायै अवदत् यत्, तव पत्युः भक्त्या सन्तुष्टोऽहं देहूग्रामं स्वयम् आगतवान् इति जानासि। (तथापि) वात्सल्यपाशे निबद्धा त्वं पुत्रस्नेहवशात् मम विस्मरणरूपी पङ्के निमग्ना असि।

अनुवादः – प्रत्यक्ष प्रकट झालेला श्रीपाण्डुरंग आक्षेपाने म्हणाला, तुझ्या पतीच्या सेवाभक्तीने प्रसन्न होवून मी स्वतः इथे देहूगावात आलो हे तुला माहितच आहे! (तरी) ममतेमध्ये निमग्न झालेली तू पुत्रांच्या प्रेमापोटी माझ्या विस्मरणरूपी चिखलात फसत आहेस.

संसारविभ्रान्तिमिमां विहाय स्मृत्वा पुनर्मामुपशानतचित्ता।
देहूपुरं याहि भजस्व नित्यं विशिष्टसान्निध्यकरं पुरे माम्।।४२।।

अन्वयः – इमां संसारविभ्रान्तिं विहाय, मां पुनः स्मृत्वा उपशान्तचित्ता देहूपुरं याहि। विशिष्टसान्निध्यकरे पुरे मां नित्यं भजस्व।

प्रतिपदार्थः – इमां = एतां, संसारविभ्रान्तिं = प्रपञ्चमोहं, मायापाशं, विहाय = त्यक्त्वा, मां = श्रीविठ्ठलं, पुनः = मुहूः, स्मृत्वा = विचिन्त्य, उपशान्तचित्ता = शान्तहृदया, शमितमनाः, देहूपुरं = देहूग्रामं, याहि = गच्छ, विशिष्टसान्निध्यकरे = विशेषसहवासयुक्ते, विशेषसङ्गयुक्ते, पुरे = देहूपुरे, मां = श्रीपाण्डुरंगं, नित्यं = सर्वदा, भजस्व = अचर्य,ध्याय।

भावार्थः – पाण्डुरंगः उवाच – एतां सांसारिकमोहभ्रान्तिं, मायापाशं त्यक्त्वा मम पुनरेकवारं स्मरणं कृत्वा शान्तमनस्का देहूग्रामं गच्छ। तत्र विशेषसहवासयुक्ते ग्रामे अर्थात् विशेषतया अहं तत्रागतः इति मम सहवासयुक्ते ग्रामे मां सर्वदा भजस्व।

अनुवादः – पांडुरंग तिला म्हणाला, या सांसारिक मोहपाश, भ्रान्ती सोडून माझे पुन्हा एकदा स्मरण कर. त्याने शान्तचित्त झालेली अशी तू देहूला जा आणि माझा विशेष सहवास असणाऱ्या त्या गावात माझी नित्य सेवा कर.

अथ प्रगे सा शयनोपविष्टा सुतौ समाहूय नितान्तदृष्टा ।
तामद्भुतस्वप्नकथामुदात्तां निवेदयामास निशान्तवृत्तम् ।।४३ ।।

अन्वयः – अथ प्रगे, शयनोपविष्टा सा नितान्तदृष्टा सुतौ समाहूय ताम् उदात्ताम् अद्भुतकथां निशान्तवृत्तं निवेदयामास ।

प्रतिपदार्थः – अथ = तदनन्तरं (स्वप्नदर्शनानन्तरं), प्रगे = प्रातःकाले, प्रभाते, शयनोपविष्टा = शयनतल्पे उपविष्टा,शय्यायाम् उपविश्य, सा = आमा, नितान्तदृष्टा = सुदृष्टा, सुतौ = पुत्रौ हरिमुकुन्दौ, समाहूय = आकारयित्वा, तां = स्वप्नदृष्टां, उदात्तां = श्रेष्ठां, अद्भुतकथां = आश्चर्यघटनां, निशान्तवृत्तं = रात्रिवृत्तान्तं, निवेदयामास = अनिवेदयत्, निवेदितवती ।

भावार्थः – स्वप्नदर्शनान्तरं प्रातः काले एव शयने उपविश्य सुदृष्टा सा पुत्रौ हरिमुकुन्दौ आकारयित्वा रात्रौ दृष्टां तां श्रेष्ठकथां, निशावृत्तान्तं तयोः पुरस्तात् निवेदितवती ।

अनुवादः – त्यानंतर सकाळीच शय्येवरती बसूनच नितांत आनंदित झालेल्या त्या मातेने दोन्ही पुत्रांना जवळ बोलावून रात्री घडलेला तो श्रेष्ठ आणि आश्चर्यकारी वृत्तांत सांगितला.

निशम्य तावूचतुरात्तहासौ स्वप्नेऽप्यहो मुग्धजनप्रतीतिः ।
जाग्रद्दशायामनुभूतमेव स्वप्ने जनः पश्यति किं विचित्रम् ।।४४ ।।

अन्वयः – निशम्य तौ आत्तहासौ उचतुः, अहो ! स्वप्नेऽपि मुग्धजनप्रतीतिः ! जनः जाग्रद्दशायम् अनुभूतमेव स्वप्ने पश्यति ! किं विचित्रम् ?

प्रतिपदार्थः – निशम्य = श्रुत्वा, आकर्ण्य, तौ = हरिमुकुन्दौ, आत्तहासौ = प्राप्तहासौ, आगतहास्यौ, उचतुः = अकथयताम्, उक्तवन्तौ, अहो = आश्चर्यमिदम्, स्वप्नेऽपि = स्वप्नावस्थायां, निद्रायाम् अपि,

मुग्धजनप्रतीतिः = इष्टजनज्ञानम्, इष्टव्यक्तेः प्रचीतिः, जनः = मनुष्यः, जाग्रद्दशायां = जागृतावस्थायां, सचेतनावस्थायां, अनुभूतम् = दृष्टं, प्राप्तानुभवं एव, स्वप्ने = स्वप्नावस्थायां, पश्यति = अवलोकयति (तत्र) किं विचित्रं = किम् आश्चर्यम्, कः विशेषः इति ।

भावार्थः – मातुः वचनानि श्रुत्वा उपहासयुक्तौ हरिमुकुन्दौ अकथयताम् यत् अहो आश्चर्यमिदम् ! स्वप्नावस्थायाम् अपि इष्टजनस्य प्रतीतिः । सामान्यतया मनुष्यः जागृतावस्थायां यत् अनुभवति तदेव स्वप्नावस्थायां पश्यति तत्र किम् आश्चर्यम् ? न कोऽपि विशेषः इति मातुः उपहासं कृतवन्तौ ।

अनुवादः – आईचे बोलणे ऐकून उपहासास्पद हास्य करीत ते दोघे म्हणाले, अहो आश्चर्य! स्वप्नात सुद्धा आवडत्या व्यक्तीचा भास होतो ! सामान्यरूपाने मनुष्य जागृत अवस्थेत जो अनुभव प्राप्त करतो तेच अनुभव त्याला स्वप्नात दिसतात त्यात काय आश्चर्य ! (अर्थात् आईला स्वप्नात देव दिसला यात काही आश्चर्य नाही.)

माता सुताभ्यामुपहस्यमानाप्यचञ्चला भक्तिमती च तस्थौ ।
भावस्थिराणामितरोक्तिजालैः कदापि चेतांसि न विक्रियन्ते ।।४५ ।।

अन्वयः – सुताभ्याम् उपहस्यमाना अपि माता भक्तिमती अचञ्चला तस्थौ । भावस्थिराणां चेतांसि इतरोक्तिजालैः कदापि न विक्रियन्ते ।

प्रतिपदार्थः – सुताभ्यां = पुत्राभ्यां, उपहस्यमाना = उपहासं क्रियमाना, हास्यमाना, अपि = तथापि, माता = आमा, भक्तिमती = भक्तियुता, श्रद्धावती, अचञ्चला = निश्चलतया, स्थिरतया तस्थौ = अतिष्ठत्, स्थितवती । भावस्थिराणाम् = निश्चलभावनानां, अचञ्चलभावानां, चेतांसि = मनांसि, चित्तानि, इतरोक्तिजालैः = अपरवाक्यसमूहैः, अन्योक्तकथनैः, कदापि = कदाचित् अपि न विक्रियन्ते = विकारितानि भवन्ति, विकृतानि भवन्ति, चञ्चलानि न भवन्ति ।

भावार्थः – मातुः स्वप्नवृत्तान्तं श्रुत्वा मातरम् उपहसन्तौ पुत्रौ दृष्ट्वा, पुत्राभ्याम् उपहस्यमाना अपि सा आमा पूर्ववत् पाण्डुरंगे निश्चलतया, स्थिरतया भक्तिमती च अतिष्ठत्। यतः भावनादृढानां, स्थिरभावानां जनानां मनांसि अन्योक्तिजालैः न कदापि विक्रियन्ते। अर्थात् अन्यवचनैः भावस्थिराः विचलिताः न भवन्ति इति।

अनुवादः – आईने सांगितलेला स्वप्नवृत्तांत ऐकून तिचा उपहास करत असणाऱ्या त्या दोघांना पाहूनही माता पूर्वीसारखीच पांडुरंगाची भक्तिभावाने निश्चलतया आराधना करू लागली कारण भावनास्थिर असलेल्या निश्चल लोकांचे मन इतरांच्या उपहासवाक्यांनी विचलित होत नाहीत.

कुपुत्ररुद्धा स्वपुरं प्रयातुं शशाक नैषा बत मन्दभागा।
अभाग्यवत्या अपि सज्जनन्याः सुपुत्रयोगो हि सुभाग्ययोगः।।४६।।

अन्वयः – कुपुत्ररुद्धा एषा मन्दभागा स्वपुरं यातुं न शशाक। सज्जनन्याः अपि अभाग्यवत्या, हि सुपुत्रयोगो सुभाग्ययोगः।

प्रतिपदार्थः – कुपुत्ररुद्धा = कुपुत्रैः, कुत्सितैः पुत्रैः रुद्धा अवरुद्धा, एषा = आमा, मन्दभागा = मन्ददैवयुक्ता, शिथिलभाग्या, स्वपुरं = स्वग्रामं, देहूपुरं, यातुं = गन्तुं, न शशाक = न शक्तवती, न अपारयत्। सज्जनन्याः अपि = समीचीनमातुः अपि, सज्जनयित्र्या अपि, अभाग्यवत्याः = भाग्यरहितायाः, दैवरहितायाः, हि = यतः, सुपुत्रयोगः = समीचीन-अपत्ययोगः, सुभाग्ययोगः = समीचीन दैवयोगः भवति।

भावार्थः – बहुवारं गमनेच्छां सूचयित्वा अपि मन्दभाग्या एषा आमा कुपुत्रैः ग्रामगमनाय अवरुद्धा, तस्मात् स्वग्रामं देहूपुरं गन्तुं न अपारयत्। उत्तमज्नयित्री, सज्जनमाता भूत्वाऽपि भाग्यरहितत्वात् एवं जातम्। यतः उच्यते खलु सुपुत्रयोगः एव समीचीनं भाग्यं योजयति इति।

अनुवादः – अनेकवेळा गावाला जाण्याची इच्छा प्रकट करूनही

दुष्टपुत्रांच्या द्वारे अडवल्या गेलेली, मन्दभाग्य असणारी आमा स्वतःच्या गावाला, देहूला जाऊ शकली नाही. सज्जन माता असूनही भाग्य नसल्याने असे झाले कारण म्हणतात ना उत्तमपुत्रयोग हाच चांगले भाग्य ठरवतो.

अन्ते पुनः क्रुद्ध इवाविरासीत्प्रकम्पमानां च जगाद देवः ।
वात्सल्यपाशेन हतासि बद्धा मोहं विजानीहि विनाशहेतुम् ।।४७ ।।

अन्वयः – अन्ते पुनः क्रुद्धः देवः आविरासीत्, प्रकम्पमानां च जगाद । वात्सल्यपाशेन बद्धा हतासि, मोहं विनाशहेतुं विजानीहि ।

प्रतिपदार्थः – अन्ते = अवसाने, पुनः = मुहुः, पुनरेकवारं, क्रुद्धः = कुपितः, रूष्टः, देवः = श्रीपाण्डुरंगः, आविरासीत् = प्रकटितः अभवत्, प्रकम्पमानां = कम्पमानां, वेपथुयुक्तां, सकम्पां, (आमां) च, जगाद = अवदत्, अकथयत् । वात्सल्यपाशेन = ममताबन्धनेन, बद्धा = गृहीता, बद्धिता, हतासि = नष्टाऽसि, मोहं = लोभं, इच्छां, विनाशहेतुं = नाशकारणं, विजानीहि = जानीहि, अगवच्छ ।

भावार्थः – असकृत् उक्त्वापि आमा स्वग्रामं न गच्छति इति दृष्ट्वा अन्ते पुनः एकवारं कुपितः देवः श्रीपाण्डुरंगः प्रकटितः अभवत् तथा सकम्पयुक्तां ताम् आमाम् अवदत् यत् ममताबन्धनेन निबद्धा नष्टा असि त्वम् । लोभं विनाशकारणम् इति जानीहि तद् अवगच्छ ।

अनुवादः – अनेकवेळा सांगूनही आमा ऐकत नाही, गावाला जात नाही आहे हे पाहून शेवटी रागावलेला देव पांडुरंग प्रकटित झाला आणि थरकापत असणाऱ्या तिला आमाला म्हणाला की ममतारूपी बंधनात गुंतलेली तू नाश करून घेत आहेस. मोह हेच विनाशाचे कारण आहे हे तू जाणुन घे.

जरातुरैषा न विचारशीला यियासति स्वप्नकथाप्रलापैः ।
इत्यात्मजौ वित्तविघूर्णिताक्षौ सावज्ञमास्तां विमुखौ जनन्याः ।।४८ ।।

अन्वयः – न विचारशीला एषा जरातुरा स्वप्नकथाप्रलापैः यियासति इति वित्तविघूर्णिताक्षौ आत्मजौ सावज्ञं जनन्याः विमुखौ आस्ताम्।

प्रतिपदार्थः – न विचारशीला = अविचारशिला, चिन्तनरहिता, एषा = आमा, जरातुरा = वृद्धा, वार्धक्ये, आगता, स्वप्नकथाप्रलापैः = स्वप्नावस्थायां निद्रायाम् अवलोकितकथावचनैः, स्वप्नदृष्टवृत्तान्तैः, यियासति = यातुम् इच्छति, गन्तुम् इच्छति, जिगमिषति, इति = इत्येवं प्रकारेण, वित्तविघूर्णिताक्षौ = धनपूरितनेत्रौ, वित्तेन धनेन घूर्णितौ पूरितौ अक्षौ नेत्रौ ययोः तौ, आत्मजौ = तनयौ, सावज्ञं = अवज्ञासहितं, अपमानसहितं, जनन्याः = मातुः, विमुखौ = पराङ्मुखौ, विरुद्धौ, आस्ताम् = अवर्तताम्।

भावार्थः – कुपितो देवः स्वप्ने पुनः आगत्य ग्रामगमनाय सूचितवान् इति मात्रा उक्ते पुत्रौ अकथयतां यत् वृद्धावस्थायां प्राप्तेयं चिन्तनरहिता स्वप्नदृष्टैः असत्यप्रलापैः ग्रामं गन्तुमिच्छति। इत्येवं प्रकारेण धनलोभेन प्रपूरितनेत्रौ, धनासक्तौ तनयौ अपमानसहितं मातुः पराङ्मुखौ आस्ताम्। अर्थात् मातुः वचनं न श्रुतवन्तौ इति।

अनुवादः – रागावलेला देव पुन्हा एकदा स्वप्नात येवून गावी जाण्यास सांगून गेला असे सांगितल्यावर ते दोघे म्हणाले की वृद्ध अवस्थेला प्राप्त झालेली, विचार न करणारी ही स्वप्नातील गोष्टींवर विश्वास ठेवून गावी जाऊ इच्छिते अशाप्रकारे धनलोभाने ज्यांची दृष्टी मत्त झालेली आहे असे तिचे पुत्र अपमान करून तिला विरोध करत होते. अर्थात् तिचे म्हणणे ऐकत नव्हते.

समाप्यमाध्यह्निकभोजनेषु सुखोपविष्टेषु जनेषु गेहे।
नृपस्य दूतस्तुरगादिरूढो जवात्परेद्युः समुपस्थितोऽभूत ।।४९।।

अन्वयः – परेद्युः माध्याह्निक भोजनेषु समाप्य गेहे सुखोपविष्टेषु जनेषु तुरगादिरूढः नृपस्य दूतः जवात् समुपस्थितः अभूत्।

प्रतिपदार्थः – परेद्यु : = अपरस्मिन् दिने, अग्रिमदिने, माध्याह्निकभोजनेषु = मध्याह्न–आहारादिकेषु, समाप्य = कृत्वा, अवसाय, गेहे = गृहे, सुखोपविष्टेषु = अनायासोपविष्टेषु, सन्तोषेन उपविष्टेषु, जनेषु = गृहनमनुष्येषु, तुरगादिरूढः = अश्वारूढः, अश्वारोहितः, नृपस्य = राज्ञः, दूतः = सन्देशवाहकः:, जवात् = वेगात्, समुपस्थितः = उपस्थितः, अभूत् = जातः, आगतः ।

भावार्थः – अग्रिमदिने यदा सर्वे गृहजनाः मध्याह्नभोजनानन्तरं सुखेन उपविष्टाः आसन् तदा अश्वारूढः राज्ञः कश्चित् सन्देशवाहकः वेगेन तत्र उपस्थितः अभवत् ।

अनुवादः – दुसऱ्या दिवशीच दुपारचे जेवण करून घरी निवांत बसलेल्या त्या लोकांमध्ये अश्वारूढ राजाचा दूत उपस्थित झाला.

आह्वानसंदेशमवाप्य राज्ञस्तदन्तिकं भ्रातृयुगं जगाम ।
तावब्रवीद्भूमिपतिः स्वराज्ये महाविपत्तिर्न चिराद्भवित्री ।।५० ।।

अन्वयः – राज्ञः आव्हानसन्देशम् अवाप्य भ्रातृयुगं तदन्तिकं जगाम ।

भूमिपतिः तौ अब्रवीत, नः राज्ये अचिराद् महाविपत्तिः भवित्री ।

प्रतिपदार्थः – राज्ञः = नृपस्य, आव्हानसन्देशं = आगमनसंदेशं, दूतवाक्यं, अवाप्य = प्राप्य, भ्रातृयुगं = सहोदरोयुगलं, तदन्तिकं = तस्य राज्ञः अन्तिकं समीपं, जगाम = अगच्छत्, भूमिपतिः = राजा, तौ = भ्रातरौ, अब्रवीत् = अवदत्, नः = अस्माकं, राज्ये = प्रदेशे, चिराद = शीघ्रमेव, महाविपत्तिः= महासङ्कटम् भवित्री = आगमिष्यति ।

भावार्थः – अग्रिमदिने आगतः दूतः राज्ञः आव्हानसन्देशं प्रदत्तवान् । तत् आगमनसन्देशं प्राप्य उभावपि भ्रातरौ राज्ञः समीपं राजगृहे गतवन्तौ । तत्र सः नृपः तौ एवम् अवदत् यत् अस्माकं राज्ये शीघ्रमेव महासङ्कटम् आगमिण्यति इति ।

अनुवादः – दुसऱ्या दिवशी आलेल्या राजदूताने राजाने, बोलविले आहे हा सन्देश दिल्यानंतर तो संदेश मिळताच ते दोघे भाऊ राजाजवळ गेले तेव्हां राजा त्यांना म्हणाला की लवकरच आपल्या राज्यावर मोठे संकट येणार आहे.

शत्रुः समन्तादवरूध्य राष्ट्रं प्रतीक्षते कालमिहाभियोगम् ।
हस्त्यश्वपादातिवरूथिनीभिः सोऽयं युवाभ्यामभिषेणनीयः ।।५१ ।।

अन्वय : – शत्रुः समन्तात् राष्ट्रम् अवरूध्य कालमहाभियोगं प्रतीक्षते । सोऽयं युवाभ्यां हस्त्यश्वपादातिवरूथिनीभिः अभिषेणनीयः ।

प्रतिपदार्थ :– शत्रुः = अरिः समान्तात् = सर्वतः, सर्वपक्षतः, राष्ट्रं = राज्यं, अवरूध्य = रोधयित्वा, स्थगयित्वा, कालमहाभियोगं = महाकालमिव अन्तिमसंकटमिव । भीषणतया, प्रतीक्षते = प्रतीक्षां करोति, तिष्ठति, सोऽयं = सः शत्रु, स्थितः अरिः, आगतः: वैरी, युवाभ्यां = द्वाभ्यां, हरिमुकुन्दाभ्यां हस्त्यश्वपादातिवरूथिनीभिः = गजतुरगादि पादसैनिकैः, अभिषेणनीयः = सेनया अभिगम्य पराजेतव्यः प्रतिकर्तव्यः

भावार्थ : – राजगृहे समाहूय राजा तौ अब्रवीत् यत् शत्रुः सर्वतः अस्माकं राज्यम् अवरूध्य, आक्रम्य महाकालमिव आक्रमणाय, प्रतीक्षां करोति (अतः) प्रतीक्षमाणः सोऽयं शत्रुः युवाभ्यां भ्रातृभ्यां गजतुरगादि सैनिकानां साहाय्येन अभिगम्य पराजेतव्यः इति ।

अनुवाद : – जवळ बोलावून राजा त्या दोघांना म्हणाला की, चारही बाजूंनी वेढा घालून शत्रु महाकालाप्रमाणे आक्रमण करण्याची वाट पहात आहे, अशा त्या शत्रुचा हत्ती–घोडे–रथ–पायदळ या चतुरंग सेनेच्या बळावर तुम्ही पराभव करा.

आदाय मूर्ध्नि नृपतेर्निदेशमापृच्छ्य भार्ये जननीञ्च नत्वा ।
सहोदरौ तो चतुरङ्गसेनायुजौ पुरादीयतुरञ्जसैव ।।५२ ।।

अन्वयः– नृपतेः निदेशं मूर्ध्नि आदाय, भार्ये आपृच्छ्य् जननीञ्च नत्वा, चतुरङ्गसेनायुजौ तौ सहोदरौ अञ्ज सा एव पुरात् इयतुः ।

प्रतिपदार्थ : – नृपतेः = राज्ञः, निदेशं = आदेशं, मूर्ध्नि = शिरसि, आदाय = स्वीकृत्य, भार्ये = द्वे अपि पत्नी, आपृच्छ्य = पृष्ट्वा, विचारयित्वा, जननीञ्च = मातरम्, अपि, नत्वा = नमस्कृत्य, चतुरङ्गसेनायुजौ = चतुर्विधसैन्यदलसहितौ गजतुरगरथपादचारिसैन्यसहितौ, तौ सहोदरो = तौ भ्रातरौ हरिमुकुन्दौ, अञ्जसा, एव = वेगेन एव, जवात्, पुरात् = नगरात्, इयतुः = प्रस्थितौ, गतवन्तौ इति ।

भावार्थः – युवाभ्यां शत्रुः पराजनीयः इति राज्ञः आदेशं शिरसि धृत्वा, सपत्नीं कुशलादिकं पृष्ट्वा, मातरं च नमस्कृत्य तौ भ्रातरौ गजतुरगरथसैनिकादि चतुरङ्गसेनया सह वेगेन एव नगरात् (युद्धभूमिं प्रति) अगच्छताम्।

अनुवादः – तुम्ही दोघे शत्रूंना पराजित करा अशी राजाची आज्ञा शिरोधार्य समजून, पत्नींची विचारपूस करून व आईला नमस्कार करून ते दोघे भाऊ हत्ती-घोडे-रथ-पायदळ या सैन्यासमवेत ताबडतोब नगरातून (युद्धभूमीकडे) निघाले.

दिनद्वयान्ते रणभूमिशय्यामुपेत्य खेदादिव तौ शयानौ ।
प्रायेण पुण्यात्पितुरात्मनो वा सुराङ्गनालिङ्गनमन्वभूताम्।।५३ ।।

अन्वयः – रणभूमिशय्याम् उपेत्य दिनद्वयान्ते तौ खेदादिव शयानौ ।

प्रायेण आत्मनः पितुः वा पुण्यात् सुराङ्गनालिङ्गनम् अन्वभूताम् ।

प्रतिपदार्थः – रणभूमिशय्यां = युद्धभूमिस्थलं, रणाङ्गणम्, उपेत्य = गत्वा, प्राप्य, दिनद्वयान्ते = दिवसद्वयानन्तरं, तौ = भ्रातरौ हरिमुकुन्दौ, खेदादिव = दुखात् इव, शयानौ = निद्रितौ (मृतौ) निश्चेष्टौ जातौ। प्रायेण = बहुशः, प्रायशः, आत्मनः = स्वस्य, पितुः वा = जनकस्य वा,

पुण्यात् = सुकृतवशात्, पुण्यवशात्, सुराङ्गना = अप्सरा, स्वर्गकन्या, आलिङ्गनम् = मेलनं, आश्लेषणम्, अन्वभूताम् = अनुभूतवन्तौ, इति ।

भावार्थः – सेनया सह प्रस्थितौ एतौ भ्रातरौ रणाङ्गणस्थलं प्राप्य युद्धे दिनद्वयानन्तरं दुःखेन पतितौ अभूताम्। प्रायशः स्वकीय अथवा जनकस्य पुण्यबलात् स्वर्गे स्थिताम् अप्सराणाम् आश्लेषम् अनुभूतवन्तौ अर्थात् स्वर्गं प्राप्तवन्तौ इति ।

अनुवादः – सेनेला घेऊन युद्धाला निघालेले हे दोघे रणभूमीवर पोहोचून दोन दिवसानंतर दुःखाने धारातीर्थ झाले. बहुतेक स्वतःच्या किंवा वडिलांच्या पुण्याईमुळे त्यांना स्वर्गातील अप्सरांचे आलिंगन अनुभवयास मिळाले म्हणजे त्यांना स्वर्गप्राप्ति झाली.

उदन्तमेतं जननी निशम्य दुःखानलप्लुष्टमना रुरोद ।
अहो मयैवात्मनि पातितोऽयं गुरुप्रसादाद्विषमो विपाकः ।।५४ ।।

अन्वयः – एतम् उदन्तं निशम्य दुःखानलप्लुष्टमना जननी रुरोद ।

अहो! मया एव गुरुप्रसादाद्विषमो विपाकः आत्मनि पातितः ।

प्रतिपदार्थः – एतं = पुत्रमरणस्य, उदन्तं = वृन्तान्तं, घटितं, निशम्य = श्रुत्वा आकर्ण्य, दुःखानलप्लुष्टमना : शोकरूपी अग्नौ ज्वलितचित्ता, शोकाग्नि–दग्धा, जननी = माता, आमा, रुरोद = रोदितवती, अहो! मया = मात्रा एव, गुरुप्रसादाद्विषमो = भगवतः कारणात्, विषमः = विपरितः, प्रतिकूलः विपाकः = ङ्कटं, आत्मनि = स्वस्योपरि, स्वीये, पातितः = स्वीकृतम्, इति

भावार्थः – युद्धभूमौ पुत्रौ मृतौ इत्येतत् वृत्तान्तं श्रुत्वा शोकाग्निना दग्धचित्ता सा माता रोदनम् अकरोत्। अहो स्वयं मया एव भगवतः वाक्यम् अश्रुत्वा, तद्वचनं विरुध्य एतत् सङ्कटं स्वस्योपरि स्वीकृतं वर्तते अर्थात् भगवता असकृत् उक्ता अपि अहं न श्रुतवती तस्य एवाऽयं परिणामः इति ।

अनुवादः – युद्धात दोन्ही पुत्र दिवंगत झाले, ही गोष्ट ऐकून दु:खज्वालांनी परितप्तचित्त झालेली आई रडू लागली आणि म्हणाली की भगवतांचे म्हणणे न ऐकल्यामुळे मीच या संकटाला माझ्यावर ओढावून घेतले. अर्थात् देवाचे बोलणे टाळल्यामुळे हा परिणाम झाला आहे.

ममापराधात्किमु दीनबन्धो ममात्मजौ दण्डितवानसि त्वम् ।
यद्रोचते तत्कुरु पाण्डुरङ्ग सर्वं सहे त्वत्पदपद्मभृङ्गी ।।५५ ।।

अन्वयः – हे दीनबन्धो! मम अपराधात् त्वं ममात्मजौ किमु दण्डितवान् असि? पाण्डुरङ्ग यद्रोचते, तत्कुरु । सर्वं सहे त्वत्पदपद्मभृङ्गी

प्रतिपदार्थः – हे दीनबन्धो = दीनानां = दुःखितानां, बन्धुः = भ्राता, हे पीडितबान्धव, मम = आमाया, अपराधात् = दोषवशात्, अपराधकारणेन, त्वं = देव त्वं, मम आत्मजौ = मम पुत्रौ, किमु = किमर्थं, किंवा, दण्डितवान् = अदण्डयत्, दण्डं दत्तवान्, असि? पाण्डुरङ्ग = श्रीविठ्ठल, यत् रोचते = यत्, तव इष्टं, तत् = तदेव, कुरु = विधेहि, सर्वं सहे = तत्सर्वमपि सहनं करोमि, त्वत्पद = तवपाद, पद्म = कमल, भृङ्गी, तव चरणकमलमधुकरी अहं सर्व सहे इति ।

भावार्थः – शोकाग्निदग्धा माता आमा देवमपृच्छत् यत् हे दीनबान्धव पाण्डुरङ्ग मम आमायाः दोषकारणेन अपराधवशात् मम तनयौ किमर्थं त्वं दण्डितवान्? तयोः मारणं किमर्थं कृतवान्? हे श्रीविठ्ठल! तुभ्यं यत् रोचते, यत्तव इष्टं तदेव कुरु । तवचरणकमलमधुकरी अहं सर्वं सहनं करोमि ।

अनुवादः – दुःखाग्निमध्ये परितप्त माता पांडुरंगाला म्हणाली की हे दीनांच्या नाथा, माझ्या अपराधाची शिक्षा तु माझ्या मुलांना का दिलीस? त्यांना का दण्ड दिलास? तरी हे विठ्ठला! तुला जे आवडेल ते कर. तुझ्या चरणकमलातील ही मधुकरी .(भ्रमरी) सगळ काही सहन करेल.

अथ स्नुषैका यशसे कुलस्य चितां स्वभर्तुर्द्रुतमारुरोह ।

अन्या ययौ गर्भवती स्वमातुर्गृहं स्ववंशाङ्कुररक्षणाय ।।५६ ।।

अन्वयः – अथ एका स्नुषा कुलस्य यशसे स्वभर्तु चिताम्, आरुरोह, अन्या गर्भवती स्ववंशाङ्कुररक्षणाय स्वमातुः गृहं ययौ ।

प्रतिपदार्थः – अथ = तदनु, हरिमुकुन्दयोः दिवं गमनानन्तरं, एका = द्वयोरेका, स्नुषा = पुत्रवधुः, कुलस्य = वंशस्य, यशसे = यशप्राप्तये, कीर्तये, स्वभर्तुः स्वपत्युः चितां = अग्निम्, आरुरोह = आरूढवती, आरोहणम् अकरोत्, प्रविष्टवती, अन्या = अपरा पुत्रवधुः, गर्भवती = गर्भयुक्ता, गर्भाधारिता, स्ववंशा रक्षणाय = स्वस्य कुलस्य अङ्कुररक्षणाय, गर्भे विद्यमानस्य, कुलपुत्रस्य रक्षणाय, स्वमातु : = स्वजनयित्र्याः, गृहं = गेहं, ययौ = अगच्छत् ।

भावार्थः – हरिमुकुन्दयोः अवसानानन्तरं, एका पुत्रवधुः वंशस्य कीर्तिवर्धनाय, यशप्राप्तये पत्युः चिताम् आरूढवती, अग्निप्रवेशम् अकरोत्। अपरा पुत्रवधुः गर्भवती आसीत् इति कृत्वा स्ववंशस्य अङ्कुररक्षणाय, कुलवर्धनाय स्वमातुः गृहमगच्छत्।

अनुवादः – त्या दोघांच्या मृत्युनंतर, एक सून वंशाच्या यशाकरिता कीर्तिकरिता पतीच्या चितेवर सती गेली तर गर्भवती असणारी दुसरी सून वंशाच्या अंकुररक्षणाकरिता आपल्या आईच्या घरी गेली.

शोकाग्निनाम्बा परिदह्यमाना कृच्छ्रेण देहूपुरमाससाद ।
सोऽग्निः शनैः शान्तिमुपाजगाम ध्यानामृतैः श्रीमधुकैटभारेः ।।५७ ।।

अन्वयः – शोकाग्निना परिदह्यमाणा अम्बा कृच्छ्रेण देहूपुरम् आससाद । श्रीमधु कैटभारेः, ध्यानामृतैः शनैः सः अग्निः शान्तिम् उपाजगाम ।

प्रतिपदार्थः – शोकाग्निना = दुःखरूपी अनलेन, परिदह्यमाणा = संतप्यमाना, ज्वाल्यमाना, अम्बा = माता आमा, कृच्छ्रेण = कष्टेन, देहूपुरं = स्वग्रामं, आससाद = अप्राप्नोत्, प्राप्तवती, आगतवती, श्रीमधुकैटभारेः = श्रीमधुकैटभ अरेः मधुकैटभनाम्ना दैतस्य, अरिः शत्रुः, विष्णुः, तस्य अर्थात् श्रीपाण्डुरङ्गस्य, ध्यानामृतैः = ध्यानरूपी सुधया,

स्मरणामृतै:, शनै: मन्दतया, क्रमश: सः अग्नि: = पुत्रमृत्युरूपी शोकाग्नि:, शान्तिम् = समाप्तिं, शान्तताम्, उपाजगाम = अगच्छत् अर्थात् शनै: तस्या : दु:खं न्यूनमभवत् इति।

भावार्थ: – पुत्रयो: अवसानानन्तरं दु:खानलेन सन्तप्यमाना, दग्धा सा माता आमा अतिकष्टेण स्वग्रामं देहूपुरं समागच्छत्। तत्र प्राप्य श्रीपाण्डुरङ्गस्य ध्यानेन स्मरणामृतेन क्षणश: मन्दतया तस्याः, दु:खाग्नि: शामित: अभवत्। अर्थात् शनै: पुत्रवियोगरूपी दु:खानल: शान्त: अभवत् इति।

अनुवाद: – पुत्रवियोगाच्या दु:खाने त्या शोकाग्निमध्ये संतप्त झालेली ती आमा खूप कष्टाने आपल्या गावी देहूला परत आली. तिथे ह्या पांडुरंगाच्या ध्यानामृताने हळुहळू तो शोकागनि थंड झाला. अर्थात् पांडुरंगाच्या सेवेत मन लीन केल्याने दु:ख हळुहळू कमी झाले.

अकिञ्चना बन्धुजनैर्विहीना पर्यश्रुरम्बा हरिमन्वयुंक्त।
विनष्टपुत्रां विवशां विभो मां कस्त्रायते वार्धकजर्जराङ्गीम्।।५८।।

अन्वय: – बन्धुजनैर्विहीना अकिञ्चना, अम्बा पर्यश्रु: हरिम् अन्वयुङ्क्त। विभो! विनष्टपुत्रां, विवशां, वार्धकजर्जराङ्गी मां क: त्रायते?

प्रतिपदार्थ: – बन्धुजनैर्विहीना = बान्धवै: विहीना, रहिता, आप्तजनविहीना, अकिञ्चना = न किमपि वर्तते यस्या: सा, असहाया, अम्बा = माता, आमा, पर्यश्रु: = अश्रुसहिता बाष्पयुक्ता, हरिं = विष्णुं, पाण्डुरङ्गं, अन्वयुङ्क्त = अप्रार्थयात्, अपृच्छातट, नष्टतनयं= गतपुत्रां, विवशां = विव्हलां, असहायां, वार्धकजर्जराङ्गीं = वार्धक्यवशात् शिथिलगात्रां, वृद्धावस्थां, शिथिलशरीरां, मां = मह्यं, आमां, क: = क: मनुष्य: व्यक्ति: वा, त्रायते = परिरक्षति:, रक्षयति इति।

भावार्थ: – दु:खशमनानन्तरं पाण्डुरङ्गस्य सेवायां, भक्तौ रता आप्तजनविहीना, असहाय्या माता, अश्रुनयनै: पाण्डुरङ्गम् अप्रार्थयत् यत्

हे प्रभो! नष्टतनयां, विव्हलां, वृद्धां, शिथिलगात्रां माम् अस्यामवस्थायां कः परिरक्षति इति?

अनुवादः – क्षणशः दुःख कमी झाल्यानंतर पांडुरंगाच्या सेवेत लीन झालेली, कोणीही नातेवाईक नसलेली, असहाय माता आमा अश्रुपूर्ण नययांनी, भगवंताला म्हणाली, हे प्रभो !अपत्यरहित, व्याकुळ व वार्धक्यामुळे शिथिल शरीर झालेल्यां मला या अवस्थेत कोण पाहिल? अर्थात् अशा परिस्थितीत कोण माझे रक्षण करेल?

तपस्विनीं तां निजगाद वाचं पीयूषकल्पामथ पाण्डुरङ्गः ।
अवेहि मां भक्तशरण्यमीशं तवैव भक्तिः परिरक्षति त्वाम्।।५९ ।।

अन्वयः – अथ पाण्डुरङ्गः तां तपस्विनीं पीयूषकल्पां वाचं निजगाद मां भक्तशरण्यमीशम् अवेहि । तव भक्तिः एव त्वां परिरक्षति ।

प्रतिपदार्थः – अथ = तदनन्तरं, आमायाः प्रश्नानन्तरं, पाण्डुरङ्गः = श्रीविठ्ठलः तां = आमां, तपस्विनीं = तपोधनां, योगिनीं, पीयूषकल्पां = अमृततुल्यां, सुधायुक्तां, वाचं = वाणीं, वचनं, निजगाद = अवदत्, उक्तवान्, मां = मह्यं पाण्डुरङ्गम्, भक्तशरण्यमीशम् = शरणागतानां, शरणं प्राप्तानां, भक्तानाम्, श्रद्धालुनां, ईशं = परेशं, परमेश्वर, अर्थात् शरणागतरक्षकम्, अवेहि = जानीहि, अवगच्छ । तव = तव आमायाः, भक्तिः = भक्तिभावः श्रद्धा, सेवा, एव, त्वां = आमां, परिरक्षति = त्रायते, रक्षयति इति ।

भावार्थः – आमायाः प्रश्नानन्तरं श्रीपाण्डुरङ्गः तपोधनां योगिनीं ताम् आमां अमृतपूर्णवचोभिः अवदत् शरणागतभक्तानां रक्षकः इत्येवं रूपेण मां पाण्डुरङ्गं जानीहि । तव श्रद्धा, भक्तिभावः एव त्वां रक्षयति इति ।

अनुवादः – आमाने माझे रक्षण कोण करेल? असे विचारल्यानंतर श्रीपांडुरंग त्या तपस्वी योगिनी आमाला अमृतवाणीने म्हणाला, की शरण आलेल्या भक्ताचा रक्षक म्हणून तु मला जाण. तुझी भक्तीच तुझे रक्षण

करील.

प्रवर्तयन्ती नयनप्रवाहं निरन्तरं साभवदन्धदृष्टिः।
शरीरयात्रामपि नित्यमेषा न वार्धके साधयितुं शशाक।। ६० ।।

अन्वयः – निरन्तरं नयनप्रवाहं प्रवर्तयन्ती सा अन्धदृष्टिः अभवत्। वार्धके एषा नित्यं शरीरयात्रामपि साधायितुं न शशाक।

प्रतिपदार्थः – निरन्तरं = अनवरतं, सन्ततं, नयनप्रवाहं = अश्रुधारां, नेत्रजलं, प्रवर्तयन्ती = प्रवाहयन्ती, विमोचयन्ति, सा = आमा, अन्धदृष्टिः = विगतदृष्टिः अन्धा, अभवत् = सञ्जाता, जाता। वार्धके = वृद्धावस्थायां, जर्जरावस्थायां, एषा = आमा, नित्यं = दैनिकं, नियमितं, शरीरयात्रामपि = स्वजीवनयात्रामपि, शरीरकार्यानि अपि, नित्यकर्माणि अपि, साधयितुं = कर्तुं, निवारयितुं, न शशाक = न शक्तवती न अपारयत्।

भावार्थः – भगवद्भक्तौ लीना तत्सेवायां सन्ततं स्वनेत्राभ्याम् अश्रु–धारां प्रवाहयन्ती एषा आमा अन्धा अभवत्। नित्यम् अश्रुप्रवाहेन दृष्टिविहीना अभवत्। तदनु वृद्धावस्थायां जर्जरगात्रा सा आमा स्वनित्यकर्माणि, स्वशरीरचालनमपि साधायितुं न अपारयत्।

अनुवादः – पांडुरंगाच्या सेवेत लीन झालेली आमा सतत वाहणाऱ्या अश्रुधारा प्रवाहामुळे आंधळी झाली. निरंतर झालेल्या अश्रूप्रवाहाने तिची दृष्टी गेली आणि अशी ती आमा म्हातारपणी शरीर थकल्याने रोजची कामे सुद्धा करू शकत नव्हती अर्थात् स्वतःचे शरीरसुद्धा चालवू शकत नव्हती.

तथाप्यहो दृष्टमिदं तदीये सज्जीकृतं सद्मनि सर्वमासीत्।
आहारपानादिकसंविधानं केनापि तत्र क्रियते स्म काले ।।६१ ।।

अन्वयः – तथापि अहो इदं दृष्टं, तदीये सद्मनि सर्वं सज्जीकृतम् आसीत् केनापि आहारपानादिकसंविधानं तत्र काले क्रियते स्म।

प्रतिपदार्थः – तथापि = यद्यपि सा किमपि कर्तुं न शशाक तथापि, अहो = आश्चर्यम्, इदं = एतत्, दृष्टं = अवलोकितम् (यत्) तदीये = तस्याः आमायाः सद्मनि = गृहे, गेहे, सर्वं = सवविधक्रियाकलापं, सज्जीकृतं = सुसज्जम्, आसीत्। केनापि = अज्ञातेन, कस्यचिद् द्वारा, आहार= भोजन, पान = पानीय, आदि = नित्यावश्यकताः, संविधानं = सज्जीकरणं, तत्र = आमायाः गृहे, काले = योग्यसमये, समये समये, क्रियते स्म = विदधीयते स्म।

भावार्थः – वार्धक्यवशात्, दृष्टिविनाशवशाच्च आमा किमपि नित्यजातं कार्यमपि कर्तुं न पारयति स्म किन्तु तथा सत्यपि आश्चर्यमेतत् यत् तस्याः गृहे सर्वविधकार्यानि सन्नद्धानि भवन्ति स्म। केनापि अज्ञातमनुष्येन तस्याः गृहे समये समये भोजनपानादिव्यवस्था क्रियते स्म।

अनुवादः – वृद्धावस्थेमुळे तसेच दृष्टिहीन झाल्यामुळे आमा काहीही करू शकत नव्हती तरी सुद्धा आश्चर्य म्हणजे तिच्या घरी सर्व काही सुसज्ज असायचे. कोणीतरी वेळोवेळी तिथे तिच्या जेवणाची, खाण्यापिण्याची व्यवस्था करत असे.

शुश्रूषितुं भक्तिमती स्नुषेयं श्वश्रूजनं हन्त समागतेति।
कुतूहली ग्रामजनो बभाषे पश्यन् गृहे व्यक्तिमदस्सदृक्षाम्।।६२।।

अन्वयः – श्वश्रूजनं शुश्रूषितुं इयं भक्तिमती स्नुषा समागता इति कुतूहली गृहे व्यक्तिमद् सदृक्षां पश्यन् ग्रामजनो बभाषे.

प्रतिपदार्थः – हन्त = आश्चर्यम्, श्वश्रूजनं = स्वसारं, शुश्रूषितुं = सेवितुं इयं = एषा, भक्तिमती = भक्तियुता, श्रद्धावती, स्नुषा = पुत्रवधुः, समागता = अत्र आगता इति कुतूहली = उत्सुकतावचनं, कौतूहलवाणीं, गृहे = गेहे, व्यक्तिमद् = मनुष्यवत्, सदृक्षां = सदृशां, तद्वदिव, पश्यन् = अवलोकयन्, ग्रामजनो = सामाजिकाः, ग्रामीयाः, बभाषे = अवदन्, अकथयन्।

भावार्थः – आश्चर्यम् । वृद्धां श्वश्रुं सेवितुं भक्तियुता श्रद्धालुः एषा पुत्रवधुः अत्र आगता इति औत्सुक्यवाक्, गेहे मनुष्यसदृशां कामपि दृष्ट्वा ग्रामजनाः अवदन्।

अनुवादः – अहो आश्चर्य, वृद्ध झालेल्या आपल्या सासूची सेवा करण्याकरिताच जणु ही सून इथे आली आहे अशा प्रकारचे कुतूहलवाक्य, घरात मनुष्यासारखेच कोणाला तरी पाहून गावातील लोक म्हणू लागले.

तपस्विनी वृद्धतरा च रुग्णा प्रयाणकालं प्रतिवीक्षमाणा ।
निष्क्रम्य देहात्पदमाप भर्तुः शैलाच्च्युता वारिनिधिं नदीव ।।६३ ।।

अन्वयः – प्रयाणकालं प्रतिवीक्षमाणा वृद्धतरा रुग्णा च तपस्विनी शैलाच्युता नदी वारिनिधिम् इव देहात् निष्क्रम्य भर्तुः पदमाप ।

प्रतिपदार्थः – प्रयाणकालं = प्रस्थानवेलां, प्रतिवीक्षमाणा = प्रतीक्षमाणा, अवलोक्यमाना, वृद्धतरा = अतीव वृद्धा, रुग्णा = रोगेन पीडिता च तपस्विनी = योगिनी, तपोधना, शैलाच्युता = पर्वतात् च्युता, मुक्ता, पतिता, अचलमुक्ता, नदी = सरित्, वारिनिधिं = सागरम्, इव = तद्वदिव, देहात् = शरीरात्, निष्क्रम्य = बहिः गत्वा, बहिरागत्य, मुक्ता भूत्वा, भर्तुः = पत्युः, पदम् = स्थानम् अर्थात वैकुण्ठम्, आप = अप्राप्नोत्, प्राप्तवती इति ।

भावार्थः – अतीव वार्धक्यं प्राप्ता, रोगैः पीडिता सा योगिनी स्वप्रयाणवेलां प्रतीक्ष्यमाना पर्वतच्युता नदी यथा सागरं प्राप्नोति तद्वत् स्वशरीरात् निष्क्रम्य अर्थात् शरीरत्यागं कृत्वा पत्युः स्थानं वैकुण्ठलोकम् अवाप ।

अनुवादः – वार्धक्यामुळे अतीव त्रस्त झालेली, अनेक रोगांनी पीडित अंतिम घटकेची वाट पहात असणाऱ्या ती तपस्वी स्त्री ज्याप्रमाणे पर्वतापासून मुक्त झालेली नदी सागरास जाऊन मिळते त्या प्रकारे

स्वशरीरातून मुक्त होऊन, शरीराचा त्याग करून आपल्या पतीच्या स्थानाला

वैकुण्ठाला जाऊन मिळाली. अर्थात् तिने देहत्याग केला.

श्वश्रूगतिं लोकमुखादवेत्य स्नुषातिशोकान्निजगाद बन्धून् ।
हा धिङ् मया मातृगृहे निवासान्नित्याभिवन्द्यापि न
सेविताऽऽर्या ।।६४ ।।

अन्वयः – लोकमुखात् श्वश्रूगतिम् अवेत्य अतिशोकात् स्नुषा बन्धून् निजगाद, हा धिङ् । मातृगृहे निवासात् मया नित्यवन्द्याऽपि आर्या न सेविता ।

प्रतिपदार्थः – लोकमुखात् = जनमुखात्, जनेभ्यः, श्वश्रूगतिं = श्वश्रूनिधनवार्ताम्, अवेत्य = ज्ञात्वा, अवगत्य, अतिशोकात् = अतीवदुःखेन, स्नुषा = पुत्रवधुः, बन्धून् = बान्धवान्, आप्तान्, निजगाद = अवदत्, हा धिङ् = धिक्कारोऽयम्! यत् मातृगृहे = मातुः गेहे, निवासात् = आवासकारणात्, तत्र उषितवती इति हेतोः, मया = स्नुषया मया, नित्यवन्द्याऽपि = नित्यनमस्कारयोग्या अपि, प्रातः वन्दनीया अपि, आर्या = सज्जनस्त्री आमा, न सेविता = न सुश्रूषिता ।

भावार्थः – स्वश्वश्रूनिधनवार्तां जनेभ्यः लोकमुखात् अवगत्य नितान्तदुःखिता सा पुत्रवधुः शोकेन बान्धवान् अवदत्, धिगिदम् यत् मातुः गृहनिवासकारणेन, मम तत्र आवासकारणात् प्रातः स्मरणीया, नित्यनमस्कारयोग्या अपि सा सज्जनस्त्री, साध्वी आमा न सुश्रूषिता इति ।

अनुवादः – सासूची निधनवार्ता लोकांच्या तोंडून कळाल्यावर नितांत दुःखी झालेली सून शोकाने नातेवाईकांस म्हणाली की धिक्कार असो, आईच्या घरी राहिल्यामुळे मी रोज नमस्कार करण्यास पात्र, पूजनीय अशा त्या साध्वीची सेवा करू शकले नाही.

ग्रामे त्वसेवि स्नुषया मयेषा रुग्नान्धवृद्धेति बहु प्रवादः ।
देवेन भक्तावनदीक्षितेन मायास्नुषा कापि विनिर्मिता स्यात् ।।६५ ।।

अन्वयः – मया स्नुषया एषा रुग्णान्धवृद्धा बहु असेवि इति ग्रामे

प्रवाद: । भक्तौ अनदीक्षितेन देवेन कापि मायास्नुषा विनिर्मिता स्यात्।

प्रतिपदार्थः – मया स्नुषया = मया पुत्रवध्वा, एषा= इयम् आमा, रुग्णान्धवृद्धा = रुग्णा च अन्धा च वृद्धा च रुग्णान्धवृद्धा, रोगपीडिता, दृष्टिहीना वृद्धस्त्री इयं साध्वी आमा, बहु = अधिकतया, सेविता = सुश्रूषिता, इति ग्रामे = देहूपुरे, प्रवाद: = प्रलाप:, वन्दती, भक्तौ = भक्तानामुपरि, श्रद्धालवेषु, अनदीक्षितेन = कृपाकटाक्षयुक्तेन, स्नेहयुक्तेन, देवेन = श्रीपाण्डुरंगेण, कापि = काचित्, मायास्नुषां = मायावी पुत्रवधु:, विनिर्मिता = रचिता, निर्मिता, स्यात् = भवेत्।

भावार्थः – प्रात:स्मरणीया सा साध्वी आमा मया न सेविता इति पुत्रवधु: चिन्तयन्ती आसीत् किन्तु देहूपुरग्रामे तु मया पुत्रवध्वा रोगपीडिता अन्धेयं वृद्धा बहुधा सेविता इति श्रुयते। प्राय: भक्तेषु वात्सल्ययुक्तेन भक्तपरिरक्षकेन श्रीपाण्डुरङ्गेन काचित् मायावी पुत्रवधु: रचिता स्यात् इति सा अचिन्तयत्।

अनुवादः – पूजनीय सासूची मी सेवा करु शकले नाही असा विचार करत असणाऱ्या सुनेला कळले की गावात तर मी, सुनेने वृद्ध झालेल्या त्या रोगपीडित अन्धमातेची सेवा केली असा प्रवाद आहे. बहुतेक भक्तांचे रक्षण करणाऱ्या, भक्तांवर प्रेम करणाऱ्या त्या पांडुरंगानेच कोणी एक जादूने बनविलेली सून तयार केली असावी.

कुतोऽन्यथा मत्समरूपनारीं गृहे विलोकेत जनस्तदीये ।
इति व्यलापीदनुतापविद्धा कर्तव्यलोपो हि कृणाति चेत: ।।६६ ।।

अन्वयः – अन्यथा तदीये गृहे मत्समरूपनारीं जन: कुत: विलोकेत ? इति अनुतापविद्धा व्यलापीत्। हि कर्तव्यलोप: चेत: कृणाति।

प्रतिपदार्थः – अन्यथा = नोचेत्, तदीये = तस्या: आमाया:, गृहे = गेहे, मत्समरूपनारीं = मम स्वरूपमिव समानरूपस्त्रियं, स्वरूपां, जन: = मनुष्य:, कुत: = कथ वा, केनोपायेन वा, विलोकेत = पश्येत,

अवलोकयेत, इति = इत्येवं प्रकारेण, अनुतापविद्धा = पश्चात्तापदग्धा, व्यलापीत् = विलापम् अकरोत्, अब्रवीत्, हि = यत:, कर्तव्यलोप: = स्वकार्यलोप:, कार्ये च्युतत्त्वम्, चेत: = मन:, चित्तं, कृणाति = खेदयति, व्यथयति इति।

भावार्थ: – देवेन कापि मायास्नुषा एव रचिता स्यात् नोचेत् आमाया: गृहे ममसमानस्वरूपां नारीं मनुष्य: कथं पश्येत् ? (अहं तु मातृगृहे आसम्) इति पश्चात्तापेन दु:खिता सा अवदत्। यत: मनुष्य: कर्तव्ये च्युत: भवति चेत् तत्कार्यं तस्य चित्तं व्यथयति।

अनुवाद: – नक्कीच देवाने कोणी मायावी सून तयार केली असावी नाहीतर मी आईच्या घरी असताना इथे आमच्या घरी माझ्यासारखीच कोणी एक स्त्री दिसणे कसे शक्य आहे अशाप्रकारे पश्चात्तापाने ती बोलू लागली. कारण कर्तव्य बजावण्यात चूक झाली तर ती चूक मनुष्याचे मन दुखवते, चूक मनाला हुरहुर लावते.

अथामा साध्वी या परमपदमाप्ता भगवत:
पदाम्भोजद्वंद्वाविरतपरिसेवाबलवशात्।।
बुधास्तां श्रीविश्वम्भरमपि तदीयं वरपतिं
तुकारामस्याहु: कुलविटपिनोर्मूलपुरुषौ।।६७।।

अन्वय: – अथ भगवत: पदाम्भोजद्वंद्वाविरतपरिसेवाबलवशात् या साध्वी आमा परमपदमाप्ता, बुधा: तां, तदीयं वरपतिं श्रीविश्वम्भरपि तुकारामस्य कुलविटपिनो: मूलपुरुषौ आहु:।

प्रतिपदार्थ: – अथ = तदनन्तरं, भगवत: = परमेश्वरस्य पाण्डुरंगस्य, पदाम्भोजद्वंद्वात् = चरणकमलयुगलात्, चरणकमलाभ्याम्, अविरतसेवाबलवशात् = निरन्तरसुश्रूषाबलेन, सततसेवाकारणात्, या साध्वी = तपस्वी, तपस्विनी, आमा, परमपदम् = सर्वोच्चं स्थानं, वैकुण्ठम्, आप्ता = प्राप्तवती, बुधा: = विद्वांस:, धीमन्त:, तां = आमां,

तदीयं = तस्याः, वरपतिं = श्रेष्ठपतिं, उत्तमनाथं, श्रीविश्वम्भरम् अपि, तुकारामस्य = संततुकारामस्य, कुलविटपिनोः = वंशवृक्षस्य, कुलपादपस्य मूलपुरुषौ = पूर्वजौ, मूलाधारौ, आहुः = वदन्ति, कथयन्ति ।

भावार्थः – एवं प्रकारेण भगवतः पाण्डुरंगस्य चरणकमलयोः निरन्तरसेवावशात्, सततसेवातः प्राप्तपुण्यवशात् या तपस्विनी आमा सर्वोच्चस्थानं वैकुण्ठं प्राप्तवती, विद्वांसः तां साध्वी आमां, तस्याः श्रेष्ठपतिं श्रीविश्वम्भरम् अपि संतश्रीतुकारामस्य वंशवृक्षस्य मूलपुरुषौ पूर्वजौ इति वदन्ति ।

अनुवादः – अशा प्रकारे भगवंताच्या पांडुरंगाच्या चरणकमलांची निरन्तर सेवा करून प्राप्त केलेल्या पुण्याईच्या बळावर त्या तपस्विनी आमाने सर्वोच्च स्थान वैकुण्ठ स्थान मिळविले. अशा त्या आमाला आणि तिच्या श्रेष्ठपती विश्वंभराला विद्वान लोक संत तुकारामांच्या वंशवृक्षातील मूळ पुरुष असे म्हणतात. अर्थात हे दोघे तुकारामाच्या वंशातील मुळ पुरुष होते.

इति सौ. क्षमायाः कृतिषु श्रीतुकाराचरिते
मूलपुरुषप्रशंसनो नाम प्रथमः सर्गः ।

⊖⊖⊖